पंचाशत्कुशनतरणात्मकं। प्रदक्षिणावर्तं। सव्यं वाममावर्तंबाधवहिनं।

अस्यकर्तृकाज्यनिर्वापात् यजमानकर्तृकवेदबंधनस्य तत्कालज्ञापनार्थः। नाज्यनिर्वापविधानार्थः। अन्यत्र विहितत्वात्। अतस्य कालज्ञापनमात्रं परेत्यपि नैककर्तृत्वमास्थेयं॥ ८

धान्यावापपात्रं लम्बवर्तुलादि निर्मितं दे

कार्यं वा। वाशब्दो विकल्पार्थः। पशुब्रह्मवर्चसान्नाद्यकामा यथासंख्यं। यथासंख्ये
न चेद्दाकारा एकुर्युः। आमुष्मादिनिकर्मसु तन्त्र्य। यत्राङ्‌ प्रयोगः कर्मविषयः यथा आ
प्रयाजेभ्य आ इडायाः इति च। तत्र तच्च कर्म प्रतिपत्तव्यं पदाङभिसंबध्यते। अभिवि
धौ कर्मविषय आ ङः प्रयोग इत्यर्थः। अंतवचने च। तच्च कर्म प्रतिपत्तव्यं। यथा
शय्यंतं इडांतं वा। प्रतिकर्मोद्धरणम प्रसंगे। कर्मप्रत्यक्षद्धरणं आहवनीयस्य कर्त्त
व्यं। न चेदन्यार्थमुद्धृतः सन्नमप्रवृत्तः। अप्रवृत्तकर्मलौकिकोऽर्थसंयोगात्। अप
वृत्तं कर्म यस्मिन् स लौकिकः प्रतिपत्तव्यः। कुत एतत्। अर्थसंयोगात्। यदर्थमु

+भवतिप

कर्म

द्धतस्तेनार्थेन संयोगात् लौकिकवद्द्रष्टव्यः। आहवनीयं संस्काररूपं। कर्माभि
निर्वृत्त्युत्तरकालं गार्हपत्ये समावेति कर्माभिनिर्वृत्तिमात्रार्थे च तस्य पृथक्क्रियेति।
अप्रकरणोत्पत्तिरनारभ्यवादः आश्रयित्वात्सर्वगुणः। यो न कस्यचित्प्रकरणे उत्प
न्नः न चारभ्य किंचित् श्रूयते वाक्यप्रकरणाभ्यामंगभावं नोपयातीत्यर्थः। स सर्वगु
णो भवति प्रकृत्यर्थो विकृत्यर्थश्च। यथा यस्य खादिरः स्रुवो भवतीति। अनारभ्यवि
हिता स्रुवे खादिरता प्रकृत्यर्थो विकृत्यर्थो च। कुत एतत्। आश्रयित्वात्। स्रुवाश्रया
हि खादिरता। स्रुवश्च प्रकृतौ विकृतौ च विद्यते। तस्मादुभयार्थे तेत्येवं प्राप्ते आ

प्रकृतिविकृत्योरुभयं प्रवर्तते ५

शि

हः। प्रकरणे चाविशेषात्। चशब्दो वाशब्दार्थे। वाशब्दश्चावधारणे। प्रकरण एव निवे
शः। प्रकरणशब्देन प्रक्रियंते यस्मिन्धर्मा इति प्रकृतिरुच्यते। तत्रानारभ्यविधेर्नि
वेशो न विकृताविति। कुत एतत् अविशेषात्। अविशेषेण प्रकृतितो विकृतौ चोदको
धर्मान्प्रापयेत्। तत्रानारभ्यविधेरपि प्रापितत्वात्। यद्यनारभ्यविधिः पुनः प्रापयेत्।
द्विरुक्तता दोषः स्यात्। न हि प्राप्तस्य सतः प्राप्तिः संभवः। अनारभ्यविधिनैव पूर्वे
प्रापिते खादिरत्वे पश्चाच्चोदकस्तदङ्गानि प्रापयिष्यत्येवं द्विरुक्तता दोषो
न भवतीति। नैतदेवं। वैकृते हि प्रधानं चोदनासारूप्यात्। प्रकृतिमपेक्षते। नानार

अनारभ्याधीतखा
दिरत्ववर्जं ५
७ सौर्यं चरुं निर्वपेदि
ति विकृतिचोदना। आ
ग्नेयम॰ पेदिति प्राकृती
ऽभयोर्निर्वपेदिति चोदन
योः सादृश्यादित्यर्थः ७।

अतिदेशवाक्यं ३

स्यादेतदेवं ४।

३०

१ यानेदमनुप्राप्तिर्यत्कृतौ तानदेवतु। प्राप्तेन पर्णतापीति व्यर्थस्तस्य पुनर्विधिः॥ अनर्थंच जुहूप्राप्तिः प्रतीत्यापर्णताविध्येः॥ न
यासहैव पर्णतं प्राप्तं सन्तु विधीयते॥ पर्णतानेव पर्णत्व निविधिस्तेन व्यवस्थितः। एवंयस्य पर्णमयी जुहू र्भवतीत्युदाहरणीयं॥१॥

भ्य विधिं। चोदनासारूप्याभावात्। दर्शनाच्च। एवं च कृत्वा विकृतौ प्रयाजादीनां दर्श
नमुपपद्यते। तस्ये प्रयाजेषु तायमानेषु ब्रेत्सणो वीणागाथी दक्षिणत उत्तरमंद्रामुदा
घ्नंस्तिस्रस्त्वयं २ संभृता गाथा गायतीति गाथागानविधिपरे वाक्ये प्रयाजानुदर्शयति।
तेच प्रकृतिसव्यपेक्षत्वे भवंति विकृतौ नानारभ्य विधिसव्यपेक्षायां तस्मादनारभ्यवाद
स्य प्रकृतिगामित्वं। युपोदाहरणं स्वादिरत्वमन्येप्येवमादयः। कार्ये तु विचारस्य तांडके
काम्याप्रतिपत्तिकल्यां अनारभ्याधीतास्ते यदि प्रकृति विकृत्यर्थास्ततो विकृतावपि प्रयो
गः। अनारभ्यवादानां तु प्रकृत्यर्थत्वे विकृतावप्रयोगः। नहि विकृतिः अनारभ्यवादमपे

Interlinear notes: साकांक्षत्वे (above line 4); उपलक्षणं। (above line 5)

Margin note:
स्तोत्रसाध्यानेककृतस्थानि
कल्पाः ५। आध्यास्तोत्री
याजकृतप्रतिपत्तः। ८
गुणफलानांप्रकृतौ
निवेशात्॥७॥

प्रकृतिवत् विकृतिः कर्त्तव्येति २।

मेक्षणमव्यादीनि

क्षते। प्रकृतिसव्यपेक्षत्वात्। वैकृतानि पात्राणि। भवंतीति सूत्रशेषः। खादिरः स्रु
वः स्यात्। स्फ्यश्च॥ चशब्दात्खादिर एव। पालाशी जुहूः। भवति। आश्वत्थ्युपभृत्। भ
वत्येव। वारणान्यहोमसंयुक्तानि। यान्यहोम संयुक्तानि तानि वारणानि भवंति। वैकं
कतानि परिशेष्याद्धोमसंयुक्तानि॥ बाहुमान्यः स्रुचः पाणिमात्रपुष्कराः त्वग्बिलाह
ंसमुखप्रसेकाः मूलदंडा भवंति। बाहुप्रमाणाः स्रुचः कर्त्तव्याः। प्रसृतांगुलिः पाणिराम
णिबंधनाद्धस्त उच्यते। तन्मात्रं पुष्करं भवति। अरत्निमात्रः स्रुवोंगुष्ठपर्ववृत्तपुष्करः।
अंगुष्ठपर्वणो यावद्वृत्तं तावत्प्रमाणं पुष्करं भवति। स्फ्योस्याकृतिः। अस्या कृतिः स्फ्यो

भवति। आदर्शाकृति प्राशित्रहरणं। चमसाकृतिवा। प्राशित्रमिति ब्रह्मणो भागा
वर्तुलं
वदानं। तद्येन पात्रेण ह्रियते गृह्यते तत्प्राशित्रहरणं। तदादर्शाकृति भवति। च
यतुरस्त्रं
मसाकृतिवा भवति। चात्वालोत्करावंतरेण संचरः। अर्थलक्षणं यत्संचरणं त
वैधं
च्चात्वालोत्करावंतरेण भवति। प्रणीतोत्करावित्थिषु। अर्थलक्षणमेव यत्संच
रणं तदिष्टिषु प्रणीतोत्करावंतरेण भवति। अंतरेण संचर इत्यनुवर्त्तते। इदा
नीमिदं विचार्यते। श्रुतद्रव्याभावे किं द्रव्यांतरेण तत्कर्म कर्त्तव्यं। उत नेति। किं
तावत्प्राप्तं सूत्रेणैव पूर्वपक्षः। चोदिताभावे नारंभस्तत्सिद्धित्वात्तस्य। चोदितस्य नारंभं नमयं चरं
निर्नपेदिसादौ ७।

६ नियतमिति निमित्तधान्नियमः इत्युच्यते। आक्षेपादिप्राप्तिर्नियतविधाने तु तेषामेवांगत्वागमात् तल्लोपे वैगुण्यप्रसंगात्। तेषामेव यावच्छक्यं पूर्वमनुष्ठानं भविष्यति। तेन यदधिकारिणः कर्तव्यतया नियतमपूर्वं तदेषां विधौ सत्यनुष्ठाने निमित्तं नियमेन ६॥

द्रव्यस्य अभावे अनारभ्यं तत्कर्म। कुत एतत्। तद्धि साधनं तस्य कर्मणः श्रुतं। द्रव्यांतरमश्रुतं। अतो द्रव्यान्यत्वे कर्मणोन्यत्वं भवति। द्रव्यदेवते हि कर्मणो रूपं भवति। सत्यमेतदेवं काम्ये। (काम्ये प्रतिनिधिना नारंभः) अथ नित्ये कथमिति। नित्येपि श्रुतद्रव्याभावे कर्मांतरबुद्ध्यानारंभे प्राप्त आह। नियते सामान्यतः प्रतिनिधिः स्यात्। नित्ये कर्मणि श्रुतद्रव्याभावे प्रतिनिधिनारब्धव्यं तत्कर्म श्रुतद्रव्यसदृशेन। कुत एतत्। उच्यते। व्रीहिभिर्यजेतेत्यत्र नियममात्रं व्रीहिश्रुतिः। न च नियमानुरोधेन यावज्जीवश्रुत्युपरोधः शक्यः कर्तुं। अवश्यं कर्तव्ये कर्मणि नियममात्रत्वे

व्रीहिभिर्यजेतेत्यस्य

नीवारैःक्रियमाणेप्रवृत्ति नान्वेयद्रूपंतत्प्रमिष्य ते। व्रीहित्वमनुसत्तिनि शिष्टशास्त्र१।

अभावेनित्तनियम्यमानत्वात्व्रीह्यादिनियमःउच्यते। अतःतद्विषयोनित्यनियमविधिः। यस्तविधिमंतरेणप्राप्तोतितद्वयमा वश्यतांशेप्रतिनिधौनियमोनिधीयते३।

वानुपादानेयुक्तरूपंतस्मात्प्रतिनिधिनाकर्मपरिसमापनीयं। यद्येवं कुतः श्रुत
द्रव्यसामान्यतइत्युच्यते। व्रीहिभिर्यजेतेत्यनेन व्रीहिजात्याउपलक्षितानां व्य
क्तिविशेषाणामंगभावोविहितोभवति। नहि व्रीहिजात्याअमूर्तत्वाद्दर्शेभिनि
र्वृत्तिः शक्यतेकर्त्तुं। नचव्यक्तिविशेषाणांजातिशब्दादृतेन्यद्वाचकमस्तितस्मा
द्व्यक्तिविशेषाएवात्रांगभूताः। तेनसदृशेषूपादीयमानेषुक्रियतामपिव्यक्तिविशेषा
णामुपादानंकृतंभवति। तस्मात्साधूक्तं नियतेसामान्यतः प्रतिनिधिःस्यादिति।
नित्येप्रतिनिधिर्भवति। काम्येपिप्रक्रांतेप्रतिनिधिर्भवत्येव। तदर्थमाह। आरंभान्

कपालं१+

यागसाधनीभूतद्रव्यप्रतिनिधिदर्शनेजातेयंग भावतंतरतिभावः६

पयेक्तिरेवभ्यः संकल्पयहविर्नयागोभिर्निर्वर्तयति। तान्दृष्टिः छागविगर्हते। आरब्धमित्यर्थं आपुरुषदृतिवदंति ५।६ कार्यव नैमित्तिकस्यापि
कर्मणः प्रतिनिध्विना समापने प्रक्रांतासमाप्तिदोषपरिहारार्थं न पूर्वासिध्यर्थमित्याशंक्यानिरासार्थं [illegible] नैमित्तिकपूर्वायवा
प्रवृत्तस्य कर्मणः सिध्यर्थमिति प्रतिनिध्या नापि अनुष्ठितव्यं। नैमित्तिककर्माकरणनिमित्तप्रसंगायपरिहारार्थव्यपरेसाधयतीत्याशं

क॰ भा॰ १

३३

नियमः। आरब्धं हि तत्कर्म। आरंभश्च समाप्तिनिमित्तं। न च प्रतिनिधिद्रव्यमं
त्रेण समाप्तिस्तस्य भवति। तस्मात्तत्रापि प्रतिनिधिर्भवत्येव। दोषश्चासमाप्तौ स्या
त्सामान्यात्। अपि च प्रक्रांतस्य काम्यस्यासमाप्तौ दोषो भवति। तदपि हि नित्यैः स
मानं भवत्येव। यथैव नित्यस्याकरणे शिष्टविगर्हणं। एवं काम्यस्यापि प्रक्रांतस्य।
ननु शिष्टविगर्हणं नाम को दोषो। अस्ति दोषो येन शिष्टा विगर्हंते। अथापि नाम
नास्ति दोषः शिष्टविगर्हणमेव दुष्टमिति। दर्शनाच्च। दृश्यते द्रव्यांतरेण समाप्तिः। य
दि सोमं न विंदेत् पूतीकानभिषुणुयादिति। अभिषवेण च समाप्त्यभिधानं। एवं

३३

०न च प्रपूतिका यागसाधनत्वेन विधीयते। सोमाभावे पूतिकया यागं कुर्यादिति। किं तर्हि सोमावयवोपलक्षणतया प्राप्तनियमो ह्ययं। नाभावे विधिरिति। तदेवावयवान्यत्वि। यत्सकलसोमानयनाभावे विकल्पानुपादद्रुतलपूतिकानिति। तस्मादल्पपिसोमावयवानामेव साधनत्वं सोमावयवसामान्यविध्यं।०।।

दर्शनेभिहितेतदाक्षिपति। अन्यार्थं दर्शनं न पुनर्ग्रहणात्। दर्शनमन्यार्थं भवति। यदन्यपरवाक्येन्यमर्थं ज्ञापयति। यथा कृष्णलहोमविधिपरे वाक्ये प्रया॰ इम

जान्दर्शयति। न चेदमन्यार्थं। कुत एतत्। पुनर्ग्रहणात् सोमाभावे सति पुनर्द्र॰

व्यांतरमन्यदेव विधीयते। एवं स्थिते। एवं स्थिते सत्यभिधीयते अन्यार्थं पुनर्ग्रहणं। पुनर्ग्रहणमेवेदमन्यार्थं। कोन्योर्थ इति चेत्। सोमाभावे यागस्य अवश्यकर्त्तव्यत्वात्सदृशद्रव्यप्राप्तावीषत्सदृशेषु पूतिकेषु व्यापारो वाक्यस्य। द्रव्यमात्रं प्राप्तमेवानेन विशेषेण नियम्यते। तस्मात्समाने द्रव्ये दर्शनमेवेदमिति। इदं सूयते।

इसरूपादिभुक्तयोवयवसाम्यात्॥

येनवाइतिपाठः।०।

पयोव्रतं ब्राह्मणस्य यवागू राजन्यस्यामिक्षा वैश्यस्येति। तदभावे चिंत्यते। किं प्रति
निधिरत्र प्रसज्यते उत न प्रसज्यते। न प्रसज्यत इत्याह। व्रते प्रसंगो न नियमशास्त्रात्।
व्रते प्रतिनिधिर्न भवति येन नियमशास्त्रोक्तं भवति व्रतं ६ त्ये वा स्यात्तो शनं भवतीति
एवकारकरणात्प्रतिनिधेर्व्युदासो न त्वत्रान्यद्विहितं यद्युदस्येत्। एवं स्थित उच्य
ते। व्रते प्रतिनिधिः प्रसज्यते। न न प्रसज्यत इति। कुत एतत्। यतो नायं नियमशा
स्त्रः। अन्यार्थोत्थ्यय मिक्षाशनस्तावकः। पुराके शाश्मश्रोर्वपनात्थेत्कामयेत तद्
श्रीयीरिति प्रकृत्य स व्रतं ६ त्ये वा स्यात्तोशनं भवतीति संस्तवोयं। इदानीमिदं क्रिया

यते। श्रुतद्रव्याभावेप्रतिनिहिते द्रव्यांतरेछागाभावेमेषे किं श्रुतद्रव्यशब्देनोपल
क्षणं। उत प्रतिनि हितेद्रव्यांतरे छागाभावेमेषे किं श्रुतद्रव्य शब्देनोपलक्षणं। उ
तप्रतिनिहितद्रव्यशब्देनेति किं तावत्प्राप्तं। प्रतिनिहितद्रव्यशब्देनेति। शब्देन हि
द्रव्यमभिधेयं। न चाविपरिणतरूपः शब्दोतितदभिधातुं। तस्माद्विपरिणा
मइत्येवंप्राप्तेउच्यते। शब्देविप्रतिपत्तिः। प्रतिनिहितद्रव्येश्रुतद्रव्याभिधायिनि।
शब्दे अविप्रतिपत्तिरविपरिणामः। अनूह इत्यर्थः। कुत एतत्। प्रतिनिध्युपादा
नं हि श्रुतद्रव्यबुध्याक्रियते न तु द्रव्यांतरबुध्या। यत्र वचनेन द्रव्यांतरं विधीयते।

यथानेवारंश्चरुं निर्वपेदिति तत्र द्रव्यांतरबुद्धिर्भवति। तत्रोहः। नन्वेवं वचनमस्ति।
तस्माद्भूयोप्यवसामान्येन श्रुतद्रव्यमेवेदमिति कृत्वा प्रतिविधेयुयादानं। अतः
श्रुतद्रव्येशब्देनैवाभिधानं। यदि वचने सति द्रव्यांतरबुद्धिर्भवति। ततः सोमा
भावे पूतिका[illegible]नभिष्टणुयादिति पूतीकानां वाचनिकत्वादुक्त विपरिणाम इ
त्येवं प्राप्ते आह। सोमेन जात्यभावात्। सोमाभावे सं(प्रतिकेषु)त्यपि वचने सोमशब्देनैवोप
लक्षणं कर्त्तव्यं। न त्वत्र द्रव्यांतरबुध्या पूतीकोपादानं। द्रव्याभावे यागस्यावश्यकर्त्त
व्यत्वाद्द्रव्यांतरे तद्गतं आह विशेषनियमः क्रियते। तस्मात्सोमशब्देनोपलक्षणं।

जात्यभावात्। जात्यंतर
बुध्यभावात्।७॥।

पत्रशादाज्यंगृह्णातिते
नानुयाजेष्वेषुचरंती
ति ॥ पृषदुणकंचित्रेणु
णकें

र्त्तव्यम्। पृषदाज्येतर्हिवाँचनिकत्वादस्तुविपरिणामइत्येवंप्राप्ते आह। आज्ये
चादर्शनात्। आज्येचाविपरिणामः। कुतएतत्। अदर्शनाद्द्रव्यांतरस्य। नत्यत्र
द्रव्यांतरबुध्यादध्युपादीयते। किंतर्हिआज्यसंस्कारायंतस्मिन्सतिपृषद्गुणकमा
ज्यंभवति। यदप्युच्यतेद्वयंवाइदंसर्पिश्चैवदधिचेतितद्गुणभूतस्यैवदध्नःप्रशं
सार्थं। किंचपशोमंत्रवर्णात्। पशोर्हिमंत्रवर्णोभवति। स्वाहादेवाआज्यपाइति
पृषदाज्यसाधनकेपिसत्युच्यते। किंच। श्रुतेश्च। एकवचनश्रुतिर्भवति। अ
थपृषदाज्यंगृह्णातीति। यदिद्रव्योपिप्राधान्यंस्यात्तर्हिद्विवचनेनभवितव्यं। न

चतदस्तीति। अथयत्रैवैकल्पिकंद्रव्यमुपात्तंनष्टंयथाव्रीहिषुनष्टेषुव्रीहिसा
मान्येनप्रतिनिध्युपादानं। उतश्रुतद्रव्यंयवाउपादेयाः श्रुतद्रव्याभावेसतिप्रति
निधिरिष्यते। नश्रुतद्रव्येसतीतियवाउपादेयाइतिप्राप्तेआह। किंकल्पेप्रवृत्तं
सर्वविकल्पोदाहरणनिर्देशः
कल्पांतरत्वात्। यस्मिन्विकल्पेयत्प्रवृत्तंद्रव्यंतत्सामान्येनप्रतिनिध्युपादा
विकल्पोपलक्षणार्थं
नंकर्त्तव्यं। नश्रुतद्रव्यंपरिंयवाउपादेयाः। किंकारणं। सर्वेषुवैकल्पिकद्रव्येषु
यजमानःस्वयमेवैकंसाधनत्वेनांगीकरोति। तत्रतदेवसाधनंनान्यत्। अश्रु
तसममेवहितदिति। यदिनरप्युपादीयतेकर्मांतरबुद्धिःस्यात्। नचसेष्यते। त

श्रुतद्रव्याभावे प्रतिनिधि + प्रतिनिधिद्रव्ये नष्टे न प्रतिनिधिसामान्येन प्रतिनिधिरुपादेयः। किं तर्हि श्रुतमेव द्रव्यं तदभावे तत्सामान्येन प्रतिनिधिरुपादेयः।
तदभावे श्रुतमेवेति सिद्धं + क्रमः। तत्कालान्तरे। स एव हि कालः प्रतिनिधेः। यः श्रुतद्रव्याभाव इति २॥
तत्॥

स्मात्स्वकीयतद्द्रव्यसादृश्येन प्रतिनिध्युपादानमिति। उक्तन्यायेन प्रतिनिहितद्रव्य
नाशे तत्सामान्येन प्रतिनिध्युपादाने प्राप्त आह। प्रतिनिधौ तत्कालात्। श्रुतद्र
व्याभावो हि प्रतिनिधेः कालः। श्रुतद्रव्यमिति कृत्वा परिगृह्यते। अतस्तस्मिन्न
ष्टे न तत्सामान्येन प्रतिनिधिरुपादातव्यः। श्रुतद्रव्यमेवोपादेयमिति। अथ यत्र
(प्रतिसदृशमेव वा)
श्रुतं द्रव्यं अर्थाभिनिर्वृत्त्यसमर्थं विद्यते खादिरं दि। अर्थाभिनिर्वृत्तिसमर्थं च प्रति
(नियोजनादि समर्थं)
निधिद्रव्यं। श्रुतद्रव्ये अर्थाभावः। प्रतिनिधिद्रव्ये चार्थाभिनिर्वृत्तिसमर्थे श्रुत
द्रव्याभावः। तत्र किं श्रुतद्रव्याभावे उतार्थाभावे स्तत्रैतदुच्यते। अर्थद्रव्यविरोधे
र्थसामान्यं तत्परत्वात्॥ तस्मिन्नर्थद्रव्यविरोधे

श्रुतद्रव्याभावो हि प्रति
निधेः कालः श्रुतद्र
व्यमिति पाठो नस्य
पूर्वपक्षे।६।

२ यदा पुनर्मुख्यं स्यादरमलं ध्वा प्रतिनिधिं औदुंबरादिकं उपादाय तत्क्षणादिषु कृत्तिषु संस्कारेषु प्राक् प्रवृत्तेषु नियोजनात्॥ खादिरं मूलं लभते
तदा किं उपात्तेन प्रतिनिधिना कार्यं कुर्यात्। उत त्यागेन मुख्यमेवोपादाय संस्कारा अपुनः कृत्वा तत्रैव प्रयुंजीतेति संशयः। त
त्रोपात्तप्रतिनिधौ निवृत्तशास्त्रेणान्यदुपपादयति। तस्मान्मुख्यसंग्रह इति प्राप्तेऽभिधीयते। नोपादानपरं शास्त्रं। येन तस्मि
न्कृते निवृत्तव्यापारं स्यात्। प्रधानानुष्ठानार्थं शास्त्रं न च प्रधानं समाप्तिं मुख्ये प्रतिनिधिनाक्रियमाणानां गुणं स्यात्। अतः संस्कृतम
पि औदुंबरादिकं हित्वा खादिरेण वप्रस्थुनिर्योज्यः। एवं व्रीह्यादिष्वपि द्रष्टव्यं।२।

यदर्थाभिनिर्वृत्तिसमर्थं तदश्रुतमपि प्रतिनिधिद्रव्यमुपादेयं। कुत एतत्। अर्था
भिनिर्वृत्त्यर्थत्वाद्द्रव्यस्य। येनार्थेन निर्वृत्तं तेन तत् श्रुतमपि सदश्रुतसममेव। अथ
यत्र गुणद्रव्यविरोधस्तत्र कथं। यथा कृष्णानां व्रीहीणां दर्विहोम इति। अकृष्णा व्री
हयः संति कृष्णाश्च नीवारास्तत्र तदुच्यते। गुणद्रव्ययोर्द्रव्यं प्रधानुयोगात्। गुणद्रव्य
विरोधे द्रव्यमुपादेयं। न गुणः। तद्धि प्रधानेन युज्यते। कथं। येन युज्यमानं यागमभि
निर्वर्तयति। अतः सन्निकृष्टं यागस्य द्रव्यं। विप्रकृष्टो गुणः। अतः सन्निकृष्टविप्र
कृष्टयोश्च सन्निकृष्टे संप्रत्यय इत्येवं प्राप्ते आह। न समत्वात्। नेतदेवं द्रव्यमेवप्र

धानेनयुज्यतेनगुणइति। सममेतदुभयंद्रव्यमपिप्रधानयोग्याम्नानसामर्थ्या

दुणोपीत्येवंप्राप्तेउच्यते। गुणानुग्रहात्। गुणेनानुगृहीतंद्रव्यमेवप्रधानयो (अवच्छिन्नं)

गि। गुणस्तुविशेषणं। विशेष्यंद्रव्यंविशेषणविशेष्ययोश्चविशेष्येसंप्रत्यय

इतिनसममेतत्। अधुनाइदंविचार्यतेयान्येकप्रधानसंबंधीन्यंगकर्माणि। किं (अग्न्यन्वाधानादीनि)

तेषांक्रमविशेषेणानुष्ठानं। उतानियमःक्रमंप्रतीति। किंतावत्प्राप्तंसूत्रेयै

वोपक्रमः।४। कर्मणामानुपूर्व्येनयुगपद्भावात्। अग्न्यन्वाधानादीनांकर्मणा

मानुपूर्व्येनास्ति। यौगपद्येनहितानिप्रधानापेक्षयागृह्यंते। नचैषांक्रमनियाम

के·भा·१

३८

२ इतरथा क्रमविशेष आश्रियमाणे विस्तरेणार्थनिर्वृत्तिः स्यात् ३

२ वर्णाः श्रोत्रेण गृह्यमाणाः इमं क्रमं अर्थादपि प्रतिपादयन्ति। एवं च अनभिप्रेतोपि वीध्यीयमानताश्रुतिक्रमो विध्यीयते। यत्र क्रमपरत्वं विधेः तद्धि शेषपदार्थपरो वा स श्रुतिक्रमः। न तु शब्दाभिहितत्वं श्रुतिक्रमलक्षणं। ४॥ ६ ब्रह्माक्षीनाम प्रासादीक्षा ब्रह्माणं दीक्षयतीत्यादिना विधे यतं कृच्चित्। तत्राह। ये ये यजमाना नास्ति एव क्रतु सिनइति वचनाद्यजमानत्वेन ब्रह्मादीनामपि अ विध्येयादीक्षा। दीक्षास्वरूपं गृहपत्यर्थं लं यचोदकादेव प्राप्तमिति। प्रासस्य क्रमस्येव विध्यानं। ८॥

१भाघवात्प्रयोगप्रांशुभा भाष्य।

अनेकार्थानामपदार्थानां

कं किंचित्कारणमस्ति येन क्रमो वसीत। तेनैकत्वात्क्रतुरवश्यंभावि निक्रमेयः

कश्चित्क्रम आश्रेयः। किंच। अर्थनिर्वृत्तेश्च। अपि चैवं सति सुखेनैवार्थाभिनि

र्वृत्तिः स्यात्। तत्र प्रधानकालातिक्रमः स्यादिति। स्याद्वानुपूर्व्यनियमः श्रुत्यर्थ

क्रमेभ्यः। भवेद्वा क्रमनियमो। नानियमः। श्रुतिरिवैकचित्क्रमस्य नियामिका भ

वति। यथा द्वादशाहे। सत्रभूते तेषां गृहपतिः प्रथमो दीक्षते। अथ ब्रह्माणं दीक्षयत्य

थोद्गातारमित्येवमादिः। ब्रह्मादीनां यजमानत्वात् प्राप्तासु दीक्षासु क्रमपरेयं

श्रुतिः। तथा च। अश्विनो दशमो गृह्यते तं तृतीयं जुह्वतीति। अर्थो अक्रमनियमो

३८

१ यत्रशानुपूर्वेपपदार्थाः विधीयंते सपाठक्रमः। यथाहृदयस्याग्रेऽवद्यति अथ जिह्वाया अथ वक्षस इति। हृदयादिषितु पाठादेव क्रमो नाथस्य हेतोः २॥

गम्यते। यथावघातपेषणयोः। अन्यथा पुरोडाशत्वेनैव न सिध्यति। पाठक्रमादपि च

क्रमोऽवसातुं शक्यते। द्विप्रकारः स श्रुतिपाठात् मंत्रपाठाच्च। विशिष्टेन क्रमेण पदा

र्थविधियोगे मंत्राणामपि च तदभिधानक्रमो विशिष्ट एव। तत्रैतच्छक्यते वक्तुं येन।

क्रमेण पदार्थानामवगमस्तेनैवानुष्ठानमिति। इतरथा प्रतीहानिरप्रतीतोपाद

नं चायुक्तमापद्यते। तस्मात्पाठक्रमादपि क्रमोऽयं गम्यते। प्राकृते च विकृतौ। न त

स्य पाठक्रमादपि क्रमोऽवसीयते येन प्राकृतं पदार्थजातं विकृतौ चोदकप्राप्तमन्य

परे वा क्रिय्यते तेनैव क्रमेणानुवदति। यथा पितृयज्ञे। उत्तरेण परिग्रहेण परिगृह्य प्रति

चोदकशब्देनानुमानिक मानदानि कृत्वा वचनमुच्यते॥

२ क्रमात्तिक्रमस्य सर्वस्य प्राप्तत्वात् सर्वशीनां गृह्य प्रादिदीक्षाणां च भेदस्पर्यं तानां पौर्वापर्येण आरणेयः क्रमः प्रतायते स एव विधीयते। दीक्षादिवाक्ये पुनर्वस्यान्यस्य प्राप्त त्रा क्रम एव विधीयत इति श्रुतिक्रमोऽयं न पाठक्रमः॥२॥

मृज्याहृ प्रोक्षणीरासादयेत्यासादयं ति प्रोक्षणीरिध्मं बर्हिरुपसादयत्येवमादि॥ स
यज्ञोपवीती भूत्वाऽज्यानि गृह्णातीति यज्ञोपवीती तत्त्वविधिपरे वाक्ये प्राकृतं क्रमं दर्श
यति। अपरे त्वन्यथैतत्सूत्रं वर्णयन्ति। प्राकृतं चैवैकृतं च यत्र कर्मणि द्वयं वा देशसंयु
क्तं भवति तत्र पूर्वं प्राकृतं कर्त्तव्यं। पश्चाद्वैकृतं। न्यायेनत्यचरितार्थेत्वात्सूर्त्रं वैकृ
तमेव भवति। सूत्रकारप्रस्यानात्रापूर्वं प्राकृतमिति। सूत्रस्य चवेदवाक्यमूलता
नुमीयते। एवं च कृत्वा पशौ तु उत्तराघारमाघार्य पशुं पूर्वं प्राकृतमिति। सूत्रस्य चवेद
वाक्यमूलतानुमीयते। एवं च त्वा पशौ उत्तराघारमाघार्य पशुं पूर्वं समनक्तीति प्राकृ

७ यथाय गव्याग्निहोत्रं जुहोति यवागूं पचतीत्यत्रापि पाकस्य दितीनयाश्रुमालिंगेन्यहे मोपयोगियवागूपसर्थ ब्राह्मणमात्। पश्चादनु
ष्ठानेयतत्विरोधात्। अंगानुपरोधेन च प्रधानबाधायोगात्। पदांगभूतपाठक्रमानुरोधेन पाकप्रयोजनहोमबाधानुपपत्तेः। पश्चात्सदिल
स्यापिनाप्यस्य पूर्वमे
वानुष्ठानं ७॥

तेल्पबादेशसंयुक्ते ध्रुवासमंजनं। यस्तु समंजनं तु वैकृतं। तदचरितार्थत्वात्पूर्वमे
वप्राप्नोति। तेन पूर्वग्रहणं कुर्वन्नाचार्योमुमर्थं ज्ञापयति ध्रुवासमंजनमेवात्र पूर्वं
माभूदिति। तथा ज्योतिष्टोमे आसाद्य हवींषि संमृश्य यदुपस्पृश्य राजानमाद्दा॰
यप्रपद्यत इति श्रुतिः। तत्र सूत्रकारेणोक्तं आसाद्याज्यानि दक्षिणेन सिद्धस्मा
जिनमास्तीर्य तस्मिन्सोमं निदधातीति। हविः संमर्शनात्मालंभनोदकोपस्पर्श
नानि प्राकृतं च विकृतावित्यनेनैव सिद्धानि विरोधेर्थस्य सरत्वात्। अथ यत्र विरो
धः पाठक्रमार्थक्रमयोस्तत्र कथमिति। यथा सवैपर्णशाखया वत्सानपाकरोति

२अग्निहोत्रं जुहोतीत्यादौ प्रयोगविधावेव तात्पर्यं ॥ क्रमस्त्वर्थ इति भावः।६१।७। विप्रतिक्रमो ह्युपसत्सु दृश्यते। यामेव पदार्थानां गम्यते।
मंत्रक्रमस्तु उपसत्सु पदार्थेषु मंत्रेषु च विनियुक्तेषु प्राथम्यादिति दुर्बलः।८।

तामाछिनत्तीषेत्वेतिपाठः। अर्थस्तु नैवं निवर्त्यते। वत्सापाकरणार्थे बर्हिःशाखा
यौछेदनं। तेन पाठक्रमार्थक्रमयोरर्थक्रमो बलीयान्। तेनोक्तमाचार्येण विरोधेर्थ-
स्तत्परत्वादिति। अर्थार्थो हि पाठः। श्रुतिः क्रमादानुमानिकत्वात्। अथ यत्र श्रु-
तिपाठक्रमयोर्विरोधस्तत्र कथं। यथा सं॰स्थिते यज्ञे ब्राह्मणतर्पणं श्रुत्याभिहि-
प्राशित्रावदानानंतरं
तं। पाठात्तु स्विष्टकृतं समनंतरं प्राप्नोति। तत्रैतदाह। पाठक्रमाद्बलीयसी श्रुतिः।
प्रत्यक्षत्वात्सं॰स्थिते यज्ञ इति। पाठक्रमे त्वनुमानं। नूनमनेनैव क्रमेणानुष्ठानं
येनैवं पाठ इति। अथ यत्र चोदनापाठस्य मंत्रपाठस्य च विरोधस्तत्र कथं। यथाज्या

५ पूर्वमंत्रऽत्तरमंत्रपाठेन यथाप्रसक्तो नोपस्थापयति तथा समिधो यजतीति समाप्यमानः प्रसक्तो वैवतन्नु न पातं ऽपस्था
पयति अतो द्वयोरपि समाम्नायपाठयोः प्रसक्तत्वादनियमः प्रसंगे प्राप्ते ब्रूमः ॥ ५॥

धिं यथाज्याधिश्रयणे सा वाज्यमधिश्रयतीषे त्वेति पठितात् तत्तु न रुद्धासयस्यूर्जे त्वे
ति पाठः। मंत्रपाठे तु आज्याधिश्रयणमंत्रप्रभृतिधर्मोऽस्ति विभ्वापुरीत्येवमादीन्
बहून्पदार्थाननुक्रम्योद्वासनमंत्र ऊर्जे त्वेति पठ्यते। यद्दिचोदना पाठोऽधिश्र
यणसमनंतरमुद्वासनंतरमुद्वासनं। अथ मंत्रपाठस्तदा उपरिष्टादिति। किं मंत्रयु
क्तो। मंत्रचोदनयोर्मंत्रबलं प्रयोगित्वात्। मंत्रपाठचोदनापाठयोर्मंत्रपाठो बलवा
न्। कर्मणि प्रयुज्यते त्वसौ मंत्रः सन्निकृष्टः। विप्रकृष्टश्चोदनापाठः। ततश्च स
न्निकृष्टविप्रकृष्टयोः सन्निकृष्टे संप्रत्ययः इत्येवं प्राप्ते आह नसमत्वात्। नैतदेवं

४ अयंमंत्रपाठपक्षे ब्राह्मणपक्षे विप्रकर्षः। मंत्रस्तु कर्मप्रयुज्यमानः परिसमाप्यमानः उत्तरं मंत्रं पर्युपस्थापयतीति सन्निकृष्टतरो मंत्रः पर्युपस्थाप्यमानः उत्तरं पदार्थं पर्युपस्थापयन्नेवपक्षमुपतिष्ठते। तस्मात् तत्रालोचनातरापेक्षाभावात्रास्ति विप्रकर्षः ४।

मंत्रपाठो बलवानिति। सममेतदुभयं। कर्मणि प्रयुज्यते मंत्रश्चोदनान्तु कर्मणः प्रयोजिकैव। अपिच। पूर्वं प्रवृत्ता चोदना। विहिते हि पदार्थे पश्चान्मंत्रः प्रयुज्यते। गुणानांतु भूयस्त्वात्। तुशब्दः पक्षव्यावृत्तौ। नैतत्समं। मंत्रपाठो बलवान्। स हि प्रयुज्यमानः उत्तरमुत्तरं पदार्थं बुद्धौ सन्निधापयति। नैवं चोदनापाठः। पदार्थस्मारको हि मंत्रः। तस्मान्मंत्रपाठो बलीयान्। क्रमनियमकारणान्युक्तानि। तेषां च बलाबलं। मिदानीं विचार्यते। यत्र बहूनां प्रधानानां सह क्रिया तत्र किमेकैकस्य प्रधानस्य सकलं गुणकांडमावर्त्तयितव्यं। उत प्रत्येकं पदार्थानुसमय यं मा

इति। सकलं गुणकांड मेकैकस्य कर्त्तव्यमिति ब्रूमः। न पदार्थानुसमयः। पदार्था
नुसमये हि प्रथमस्य पदार्थे कृते द्वितीयस्य तस्मिन्नेव क्रियमाणे पूर्वेस्य व्यवधा
नं स्यात् इत्येवं प्राप्ते आह। तुल्यसमवाये सामान्यपूर्वमानुपूर्व्ययोगात्। तुल्यानां
प्रधानानां सहप्रयोगे सति सामान्यं पूर्वं कर्त्तव्यं। समानः पदार्थः सर्वेषां पूर्वैः पूर्वैः
कर्त्तव्यः। एवं क्रियमाणे आनुपूर्व्येण प दार्था युज्यंते। तन्मंत्राश्च। इतरथोत्तरप
दार्थोभिनिर्वृत्य उत्तरकालं पूर्वेषु क्रियमाणेषु आनुपूर्व्ययोगो न स्यात्। तस्मात्स
दार्थानुसमयः। अथवानुपूर्व्ययोगादिति सकलगुणकांडेऽपवृज्यमाने आनुपूर्व्ये

क्रमेण प्रयुक्तानि प्रधानानि भवंति। तत्र सहत्वप्रापकः प्रयोगवचनो बाध्यते। य
त्तु नरुच्यते पूर्वस्य पदार्थे कृते सति तस्मिन्नेव द्वितीयस्य क्रियमाणे पूर्वस्य व्यवधा
नमिति। तत्सहत्वविधानेन परिह्रियते। आह च। सकले गुणकांडं चेदेकैकस्या
पि दृश्यते। सहत्वप्रापको नैव प्रयोगवचनो भवेत्॥ १॥ अतः पदार्थानुसमये क्रि
यमाणे क्रमश्चानुगृहीतो भवति। सहत्वं चेति। एवं सति समदशासु प्राजापत्ये
षु षोडशिभिः पदार्थैः समानजातीयैर्व्यवधानमिष्यते। अनेनैव मुख्यक्रमप्रवृ
त्तिकावुक्तावेव भवतः। कथं। प्रथमस्य नियोगं कृत्वा द्वितीयादीनां नियोगे कृ

तेयदिमोक्षणं द्वितीयप्रभृतिक्रियंतेसप्तदशभिरष्टादशभिर्वापदार्थैः प्रथम
स्यप्रोक्षणस्यव्यवधानंस्यात्। मुख्यक्रमेप्येवं। कांडक्रमंवक्ष्यत्युपरिष्टात्।
उक्तेनन्यायेनचतुरोमुष्टीन्निर्वपतीत्यत्रमुष्टिनामनुसमयेप्राप्तेअष्टौक
पालान्युपदधातीत्यत्रचकपालानुसमयेप्राप्तेआह। नैककर्मणिसंबंधात्। नि
र्वापकर्मणिनमुष्टिनानुसमयः कार्यः। चतुर्मुष्टिको निर्वापएकः पदार्थः प
दार्थावयवोमुष्टिः। नचावयवेनानुसमयः कर्त्तव्यः। पदार्थेनत्वनुसम योभव
ति। पदार्थस्य कर्त्तव्यः। अवयवस्कतादर्थ्येनैवक्रियतेसंख्यामुष्टयश्च। मुष्टीनां

निर्वापसंबंधः। व्यवछेद्यव्यवछेदकभावस्तार्थेन वाक्यावगतः। तेन वाक्यभे
दो न भवति। एवं सर्वत्र पदार्थानुसमये प्राप्ते आह। ग्रहणासादनावदानप्रदा
नेषु वचनात्। ग्रहणासादनांतं। अवदानं प्रदानांतं कर्त्तव्यं। शास्त्रांतरात्। ए
वं सर्वत्रावदाने प्रदानांते प्राप्ते आह। न द्रव्यभेदे गुणयोगादिति पात्स्यः। द्र
व्येषु भिन्नेषु देवताया अभिन्नायां नावदानं प्रदानांतं कर्त्तव्यं। यथा सप्तद
शसु प्राजापत्येषु स्विष्टकृद्भागेव अनेकहविष्के। कुत एतत्। सर्वांगानां प्रधा
नं प्रति गुणत्वेन योगात्। तद्यवदानं प्रदानांतां क्रियते गुणानुरोधेन प्रधाना

वृत्तिः कृता स्यात्। नचासाविति। इदमन्यद्विचार्यते। कस्मिंश्चित्कर्मणि प्रक्रांते ऽपरिसमाप्ते एव नित्यं कर्तव्यमुत न कर्त्तव्यमिति। व्यवधानान्न कर्त्तव्यमित्येवं प्राप्ते आह। प्रवृत्ते नियतं दोषविशेषात्। प्रवृत्ते कर्मणि नियतस्य काल आयाते नियतमेव कर्त्तव्यं। अकरणे हि दोषः स्यात्। ननु पूर्वस्यापि व्यवधाने दोष एव। सत्यमेवं। अत्र तु विशिष्टतरो दोषः। प्रधानस्यैवाक्रियेति। तत्र पुनर्गुणभूतानां पदार्थानां व्यवधानेप्य दोषः। तस्मान्नियतमेव तावत्कर्त्तव्यं। षोडशिनित्वानुपूर्व्यभूयस्त्वात्। ज्योतिष्टोमे तु। विग्रहाणां परतः षोडशी श्रूयते। तस्य

क॰भा॰१

४४

सुर्णास्तसन्निध्यौ

चकालः समयाँध्युषितेषोडशिनः स्तोत्रमुपाकरोतीति। तद्यदिदैवाद्यामानुषाद्याप्र
तिबलाक्रप्रविग्रहण्णामुत्कर्षः स्यात्। षोडशिनोप्युपाकरणकालम्बोयातस्तत्र
किंषोडयाकरणंकर्त्तव्यंउतोत्क्रम्यविग्रहाणांपरतः क्रमेणेतिप्रवृत्तेनियतमिति
न्यायेनषोडशिनउपाकरणेप्राप्तेउच्यते। षोडशिनिस्थानुपूर्व्वभूयस्त्वात्। षोडशि
नितुनैवंक्रमेणउत्क्रम्यविग्रहाणांनापरतउपाकरणंकर्त्तव्यं। एवंगुणभूयस्त्वं।
इतरथाषोडशिनोवैगुण्यमुत्क्रम्यविग्रहणांव्यांच। उत्कर्षेतुषोडशिनएवेति। ४४
तस्मादुत्कृष्यतएवषोडशी। अग्निहोत्रादीन्कदाहृत्यचिंत्यते। किंपाठक्रमेणे

षामनुष्ठानमुक्तानियमः क्रमंप्रतीति। पाठक्रमेणानुष्ठानमितिब्रूमः। पाठोहिक्र
मस्यनियामकइत्युक्तं एवंप्राप्तेआह। अनियमः फलसंयुक्तेषु। प्रधानकर्मसुक्र
मंप्रत्यनियमः कानिचिन्नियतकालान्येवपठ्यंते। कानिचित्कामनयाक्रियंते।
नचैषांपरस्परंतः संबंधोस्ति। यथांगकर्मणामेकप्रधानसंबंधः। यस्यैवनिमित्त
मायातंतदेवकर्त्तव्यंपाठक्रमस्तर्हिकिमर्थः क्रमोविध्यर्थः क्रमेनानुष्ठानार्थः। कर्मण्यसंभावात्॥ विध्यानार्थः ५+
सर्वे। वाराप्यरेकर्मण्यसंभवात्। मरणकामस्यासौविहितः ततोनुष्ठानक्रमस्यासं
भवइति। अवत्तस्यावदानस्यनाशेकिंहविरंतरमुत्पाद्यतेउतान्यत्ततएवावहीयते।

किंतावत्प्राप्तं। सूत्रेणैव सिद्धांतः॥ ५॥ अवत्तनाशेन्यद्गुणानुग्रहात्। एवंगुणा
नुग्रहः कृतोभवति। इतरथागुणाहीनेनयागः कृतःस्यात्। येपूर्वस्मिन्हविषिगु
णाः कृतास्तेध्रुवदाननिष्ठास्तद्विनाशाच्च। विनाशमुपगतास्तस्माद्गुणहीनंत
त्। नचगुणहीनेनयागइष्यते। एवंप्राप्तेब्रूमः। नपूर्वशेषात्। नैतदेवंहविरंत
रमुत्पादयितव्यं। यतः पूर्वस्यैवहविषः संस्कृतस्यशेषोविद्यते। ननुचध्रुवदा
नविनाशेनगुणविनाशात्संस्कारहीनंतदिति। नेत्युच्यते। उपभोगेनहिसं
स्काराणामपवर्गोभवति। नचोपभुक्तास्तेप्रक्षेपाभावात्। तस्मात्तत एवदेयं।

४४

स्विष्टकृ[illegible]तेऽस्य
[illegible] स्विष्टकृतास
हवर्तमानंसास्विष्ट
कृतः॥

अचोदितत्वाच्च। नचैवंविधाचोदनास्ति। अवदाननाशेहविरंतरोत्पत्तिःकार्ये
त्यतस्ततएवावदेयं। स्विष्टकृद्दानुपूर्व्ययोगात्। अपिचततएवावदीयमाने
स्विष्टकृद्धूर्देतद्धविर्भवतिसस्विष्टकृद्वतीत्यर्थः। प्रधानावदानसमनंतरंस्विष्ट
कृदर्थमवदानंभवति। यदितदेवनगृह्यतेस्विष्टकृदर्थमपिततोनगृह्यते। ततो
हविषउत्पत्तिरनर्थकैवस्यात्। नचसेष्यते। इत्येवंप्राप्तेआह। गुणहानौतुशेष
भावात्। तुशब्दः पक्षव्यावृत्तौ। नततएवपुनरवदेयं। गुणहीनंहितदित्युक्तमे
व। येतत्रसंस्कारास्तेतैश्चैत्रवदाननिष्ठास्तद्विनाशाच्च। विनाशमुपगतास्तस्मा

त्संस्काररहीनत्वात्। नततोवर्द्देयं। अपिच। मध्यात्पूर्वार्द्धाच्चावद्यतीतिश्रुतिस्तद
भावाच्चगुणहीनमेवतदिति। तस्माद्धविरंतरोत्पत्तिः कार्येति। आहच। संस्कार
णांपुरोडाशेष्ववदानंप्रयोजकं। तद्विनाशाच्चनष्टास्तेनावर्द्देयमतस्ततः। अपि
च। गृहीतोमध्यपूर्वार्द्धौतौचनष्टावुभावपि। अतःशेषस्यशेषत्वात्प्रधानत्वंन
युज्यते। नियतेसामान्यतःप्रतिनिधिःस्यादित्येतदुक्तमधस्तात्तेनदेवतादीना
मपिप्रतिनिधानेप्राप्तेआह। नदेवताग्निशब्दक्रियाःपरार्थत्वात्। नप्रतिनि
धेयानिएतानि। नत्वेतानिप्रतिनिधीयमानानियदर्थेप्रतिनिधीयंतेतत्का

र्यंकुर्वंति। देवतायास्तायैंद्रयागेतदस्मरणेयदाग्निःप्रतिनिधीयतेनतत्कार्यक
रोभवति। ऐन्द्रयागनिबंधनेयदपूर्वंनतदाग्नेयेनसाध्यते। अग्नेरप्याहवनीया
देरभावेयद्यग्न्यंतरंप्रतिनिधीयतेनाहवनीयकार्यंकरोति। अन्यद्ध्यदृष्टमाहवनी
यस्याधिकारणत्वइति। शाक्तोमंत्रः। सोपिमंत्रांतरकार्येनवर्त्तते। नहिपेषणमंत्रः
प्रथनंप्रकाशयति। क्रियाहिद्विप्रकारादृष्टार्थाअदृष्टार्थाच। साचप्रतिनिधीया
मानाक्रियांतरकार्यंनकरोति। नहिपेषणमवघातकार्येवर्त्तते। अदृष्टार्थाया
मपिक्रियाय्याभिधीयते। नहिप्रयाजाअनुयाजकार्येवर्त्तंते। नचाःप्रयाजाहि

नोऽप्रतिनियतानित्यदृष्टानीति। कामं देवतां। योऽग्निशब्दः क्रियां प्रतिनिधत्ते स
कामं देवतामपि प्रतिनिदध्यात्। अग्निशब्दादीनां अप्रतिनिधेयत्वार्थमिदमु
क्तं। येन देवताप्रतिनिधानं नैव शक्यते। न ह्याग्नेयैन्द्रस्य देवतात्वं चोदनाल र
क्षणं हि तत्। तेनान्यत्रान्या देवतैव न भवति अचोदितत्वात्। प्रतिषिद्धं प्रत्य
वायात्। नेति वर्त्तते। यत्प्रतिषिद्धं न तत्प्रतिनिधेयं। यथा श्यामाकचरौ कोद्रव व
रटाः मौग्द्रचरौ माषाः इति। अन्ति। प्रतिनिधित्वेन हि निषेधो भवति। अयज्ञिया
उ वै कोद्रवाः। अयज्ञिया माषा इति प्रतिनिधित्वेन प्राप्ते यं प्रतिषेधः। प्रतिषेधवि

करटाः श्यामाकारो व्रीहिविशेषः

ध्यतिक्रमेणाच प्रत्यवायः। स्वामीफलयोगात्। स्वामीयजमानः। यः स्वद्रव्यपरित्या
गेन फलं साधयति। तस्य यः प्रतिनिधीयेत। स एव तत्कर्मफलेन युज्यते। न पूर्वः।
अतो न तस्यार्थे वर्त्तते। तस्मात्स्वामिनां प्रतिनिधिर्न। एवं सर्वत्राप्यप्रतिनिधाने
प्राप्त आह। गुणेषु प्रतिनिधिः परार्थत्वात्। पात्रासादनाद्यौऽन्यावेक्षणादिषु गुणप

आदिशब्दात्सत्रार्थं सः नस्तु तस्तु पात्रासादनादिषु सर्वसार्थं

क्रत्वर्थेषु

दार्थेषु स्वाम्यपि प्रतिनिधीयते। सत्रेषु तु श्रुतेः। सत्रेषु पुनः स्वामी श्रवणादेव प्र
तिनिधीयते। अथ यदि संदीक्षितानां कश्चिदुपतपेत्। तस्य योनेदृशी स्यात्तमुप
दीक्ष्य तेन सह यजेरन्निति श्रुतेः॥ स तु कर्मा कर्मयोगात्। स नैष्टी चिन्त्यते। यजमान दि

धर्मैर्युज्यते। उत न युज्यत इति। अयजमानत्वान्न युज्यत इत्येवं प्राप्ते ब्रूमः। स नैदि
शीतद्धर्मैः स्यात्। कुत एतत्। तत्कर्मयोगात्। यजमानकर्मणा हि तस्य योगः। तद्धर्म
संस्कृतेन तद्धर्मानुष्ठानं कृतं। अयमपि तद्धर्मसंस्कृत एव करिष्यतीति। इदंविचा
र्यते। किं सत्राणि ब्राह्मणानामेव भवंति उत त्रयाणां वर्णानामपि। वे[illegible]घत्वात्त्र
याणामपि प्राप्ते आह। सत्राणि ब्राह्मणानामृत्विक्श्रुतेः। ब्राह्मणानामेव सत्राणि
न क्षत्रियवैश्ययोरिति। कुत एतत्। ऋत्विक्श्रवणात्। ये ऋत्विजस्ते यजमाना इति।
श्रूयते। न च ऋत्विजो यजमानाभ[illegible]वंति। परकीये कर्मणि यः प्रवर्तते स ऋत्विगित्य

च्यते। तेनानेनप्रकारेणऋत्विजांयजमानसंस्काराविधीयंतइति। गौण्यावृत्या
एवं ऋत्विजांयजमानत्वंभवति। एवंचसतियजमानसंस्कारेभ्योऽदृष्टपरिकल्प
नं। तेनान्यथावर्ण्यते। ऋत्विक्शब्देनार्त्विजीनान्यदार्थानन्नूयतत्कर्त्तृत्वेन
यजमानानांविधानं। एवंदृष्टार्थत्ताभवति। प्रत्याम्नानाच्चऋत्विजोनिवर्त्तंते।।
नन्वेवमपिऋत्विक्शब्देनगौण्यावृत्यातत्कर्माभिधानं। सत्यमेवं। इतरस्मिन्प
क्षेगौणीवृत्तिरदृष्टपरिकल्पनाचेति। तस्मादृत्विक्पदार्थेषुयजमानानांकर्त्तृत्वेन
विधानं। एवंचसतियेनक्रियमाणाआर्त्विजीनाःपदार्थाःसगुणाभवंतितस्यैवाधि

कारइति। तस्माद्ब्राह्मणानामेवाधिकारः सत्रेषु॥ एककल्पानामवैगुण्यात्। गा।
निवैककल्पानांभवंति। एकः कल्पो येषां तनूनपाद्याजित्वं नाराशंसयाजित्वं वा
तेषां सत्राधिकारः। एवमवैगुण्यं भवति। यद्येवं तुल्यप्रमाणानां भवंतु। एवमपि
हि श्रूयते। यजमानसंमितोदुंबरी कार्येति। यस्यैव यजमानस्य प्रमाणं नोपसंहि
यते तस्यैव वैगुण्यं स्यादित्येवमाशंकितस्याह। न परार्थत्वात्। नातुल्यप्रमाणे कै
वैगुण्यं भवति। परार्थो हि यजमानोऽत्र। न तनूनपाद्याजित्ववत्स्वार्थता। तत्र त
नूनपाद्याजिनां नाराशंसेन वैगुण्यं। नाराशंसानां च तनूनपातेति। इह पुनर्न

तथा। इह हि यजमानसंमितौदुंबरी कार्या। सा च येन केनचिद्यजमानेन संमिताभ
वतीति तस्माद्बहुषम्ये तन्नूनपातेति। वैश्यराजन्ययोर्गार्हपतेंप्यार्त्विजिनेषु परा
र्थेषु क्षत्रियवैश्ययोरनधिकारः। गार्हपते तर्हि अधिकार एवमाशंकिते धस्तनसत्रान्ते
तिप्रतिषेध आरभ्यते। गार्हपते पि परार्थे वैश्यराजन्ययोर्नाधिकारः। कुत एतत्।
विषमो हि तयोर्ब्रह्मसामकल्पः॥ बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यात्। पार्थुरश्मं
राजन्यस्य रायोवाजीयं वैश्यस्येति। तेनेतरेणेतरस्य वैगुण्यमितरस्य चेतरेणेति। त
स्माद्गृहपतित्वेनापि वैश्यराजन्ययोर्नाधिकारः। अक्रांतेषु सत्रेषु तद्विषयमेव वचिं

स्यते। अस्तिसहस्रसंवत्सरंसत्रं। किंतन्मनुष्याणांभवतिकेनचित्कारणेन। उतनभ
वतीति। किंतावत्प्राप्तं। सूत्रेणैवपक्षः॥ सहस्रसंवत्सरंमनुष्याणामसंभवात्। अ
मनुष्याणामितिपर्युदासेसतिदेवानांस्यात्। तेचपूर्वमेवनिराकृताः। मनुष्याणां
वारंभसामर्थ्यादित्यत्र। तस्मान्नञः प्रतिषेधार्थतावर्ण्यते। अमनुष्याणामिति।
मनुष्याणांनभवतीत्येतदुक्तंभवति। तथाचोत्तरसूत्रेमनुष्यविषयैवाभ्यनुज्ञा
स्याद्देहानित्यत्वादिति। किमितिमनुष्याणांनभवति। तदायुष्यस्यासंभवात्।
नहिमनुष्याःसहस्रायुषःसंति। स्याद्देहानित्यत्वात्। भवेद्वासहस्रसंवत्सरंमनु

ष्याणामेव। कुत एतत्। देहानित्यत्वादिति। नहि नित्यपरिमाणं मनुष्याणामा
युरिति। कश्चिच्छतं वर्षाणि जीवति। कश्चिदभ्यधिकतरमिति। अपरिमितायु
षो मनुष्या इति। तस्य च कार्यत्वात्। क्रियते त्वायुराघः श्रापकेण कर्मणा। यथामि
त्रविंदा श्रीराष्ट्रमित्रायुष्कामस्येति मित्रविंदया आयुर्भवतीति। तथा च काठके।
आयुः कामस्यामृतचरुरिति। नासंभवात्। नहि तच्छ्रापकेन कर्मणा सहस्रायुष्ट्वं
भवति। आयशः शतायुष्ट्वमेव मनुष्याणामनूद्यते। शतायुर्वै पुरुष इति। शास्त्रसंभ
वादिति भारद्वाजः। अस्ति हि शास्त्रं आयुषोभिवृध्यर्थं मित्रविंदया आयुष्कामोय

जेतेति। नचतत्रायुषः परिमाणमुक्तं। भविष्यतिकश्चित्कर्मोभ्यासेनसहस्रायुरि
ति। नादर्शनात्। नैतदेवंसहस्रपरिमाणमायुः कर्मणाक्रियतइति। नैवंविधंवा
क्यमस्ति। आयुर्दीर्घंभवत्येतावदुच्यते। नचदृश्यंतेसहस्रायुषोमनुष्याः। कथं
तर्ह्यायुःप्रापकाणिविहितानिउच्यते। अपमृत्युनिरासार्थानितानि। अपमृ
त्युनापिहिमरणंभवति। अथर्वणेपद्यते। एकशतमपमृत्यूनामिति। तैनैकंप
रमायुस्तदुल्लंघनेकर्मणापिनशक्यतेकर्तुं। तस्मादपमृत्युजयार्थान्यायुःप्राप
काणि। तथाचाह। मर्त्याः पितरः पुराह्यायुषोम्रियतेयस्तर्ह्यौधत्तइतिपरमायुषः

पूर्वमपि अपमृत्युनामरणं दर्शयति। तथा चायं पुनर्मृत्युं जयति। सर्वमायुरि
यादिति। तथा च मानवे कथं मृत्युः प्रभवतीत्युक्ता। अनभ्यासेन वेदानामा
चारस्य च लंघनात्। आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसतीति आह।
अपमृत्युनापि मरणं भवतीत्यमुमर्थं ज्ञापयति। अतः सहस्रायुष्यस्यासंभवा
दित्युक्तं। एवं स्थित इदमुच्यते। कुलसत्रमिति कार्ष्णाजिनिः। यजमानकुलीनाः स
परिसमापयिष्यंतीति एतत्सूत्रं। तच्च पितृकरिस्थन्यायेन त्वत्रान्यातिरस्ति स्वाम्यु
त्पानमिति लौगाक्षिः। कार्ष्णाजिनिपक्षनिराकरणार्थमेतत् सूत्रं। कुलसत्रं केचि

द्वारब्धं केचित्परिसमापयिष्यंति। नचावयवात्फलमिष्यते। यद्येवंवरं साम्युत्थानमेव। सर्वं चेतरद्यपिनोपपद्यते अत आह॥ अन्हां वा शक्यत्वात्। अन्हां वैतत्सहस्रमंगीकर्त्तव्यं। संवत्सराणामशक्यत्वात्। मुख्यार्थासंभवे च गौणी वृत्तिराश्रीयते च। एतेन संवत्सरशब्दो गौण्या वृत्त्याहर्विषयः। संख्यायाः कस्माद्गौणी वृत्तिराश्रीयते अत आह। श्रुतिसामर्थ्यात्। श्रुत्या हि संवत्सरशब्दोऽहर्विषयः प्रदर्शितः। अहर्वै संवत्सर इति। तस्मादन्हां सहस्रमंगीकर्त्तव्यं। प्रकृत्यनुग्रहाच्च। एवं च प्रकृतिरनुगृहीता भवति। प्रकृतौ हि द्वादशाहेऽहानि संख्येयानि। इहापि तद्वदेव संख्यायोग इति॥६॥ कर्मण्यां

युगपद्भावस्तंत्रं। अत्रेदं विचार्यते। प्रधानकर्मणां यौगपद्येसह प्रयोगेसति किमंगक
र्मणां तंत्रमुत प्रतिप्रधानमंगावृत्तिरित्येवं प्राप्त उच्यते। कर्मणां युगपद्भावस्तंत्रं। प्रधा
नानां सहप्रयोगेसत्यंगानां तंत्रं सकृत्क्रिया। कुत एतत्। शक्यपुरुषार्थकृतत्वैकार्थ स्त
समवायश्रुतिभ्यः। युक्तं यत्प्रधानकर्मणां सहप्रयोगेसत्यंगानां सकृत्क्रियेति। कुतः।
शक्यत्वात्। शक्यतेह्यदृष्टोपकारिणांगेनानेकेषामुपकर्त्तुं। अगृह्यमाणविशेषत्वा
त्प्रदीपवत्। पुरुषार्थकृतत्वाच्च। प्रधानान्यंगवंति कर्त्तव्यानीति पुरुषार्थः। सकृत्कृ
तैरेवासौ कृत एव भवति। एकार्थसमवायश्रुतेश्च। एकस्मिन्नर्थे फले चेद्बहुभिः प्रधानैः सा ति

ध्येऽङ्गानांसमवायश्रुतिर्भवति।ताएकविंशतिराहुतयोद्वावाघारौपंचप्रयाजाद्वावा
ज्यभागावाग्नेयःपुरोडाशस्तद्वदाग्नीषोमीयउपांशुयाजोऽग्नीषोमीयःपुरोडाशोऽग्निःस्वि
ष्टकृदिडात्रयोऽनुयाजाःसूक्तवाकश्चंयोर्वाकश्चाप्यपरेवारसः पत्नीसंयाजेषुसंप्रगृण्हा
तिसमिष्टयजुश्चेति।आहुतीनामेकविंशतिसंख्यादृश्यते।साचतंत्रपक्षेभवेतीरथ्या।
आहुतिशब्दोपलक्षणयातद्विधिपरएवस्यात्।अपरेऽन्यथावर्णयंत्येतत्सूत्रं।शक्य
पुरुषार्थत्वात्।शक्यतेहिसकृत्कृतेनाप्यंगेनबहूनामुपकर्त्तुंपुरुषार्थवत्।यथापु
रुषार्थेनप्रदीपेनेति।अपिच।कृतमप्यंगंयदिपुनःक्रियतेतत्कृतत्वादेकार्थवत्कृतं

भवति। यथा प्रदीप एव कृतः पुनः क्रियते। समवायस्तूक्त एव। अतः सहप्रयोगे प्रधा
नानामंगानां सकृत्क्रियेति। सहप्रयोग एव प्रधानानां कुतः। फलं कर्म देशकालद्र
व्यदेवतागुणसामान्ये। यत्रैकेन प्रयोगवचनेन बहूनि प्रधानान्युपादाय फले विधी
यंते तत्र सहप्रयोगः। इतरेतरसव्यपेक्षाणि हितानि विहितानि। यथा वैश्वदेवेन प्र
जाकामया जयेति। तत्र वैश्वदेवशब्देन समुदायवचनेनाष्टानां हविषां सहत्वं। यदि
चैतेषां कर्मापि समानं भवति पंचप्रयाजतोऽत्येवमादि भिन्नांग कर्मणां सहप्रयोगे स
तीतरेतरवैगुण्यं स्यात्। देशसामान्ये च सहप्रयोगो न भिन्नदेशानामशक्यत्वात्।

कालसामान्येप्येवं। परिक्रयद्रव्यसामान्ये सह प्रयोगो युक्तः यथा त्रिषंयुक्तेषु। त्रयाणां वामनस्त्रयाणां श्यामस्त्रयाणां च पशुरिति। देवतासामान्ये पुनः समानमुच्चारणं। यथा समद्दशासु प्राजापत्येष्वनुवाचने प्रैषे च। यदि च तासां देवतानां गुणोपि समानो भवति। यथा तत्रैवोपांशुत्वं। गुणभेदे पुनः शक्यं सहोच्चारणं। यथोपांशुयाजदेवताग्नीषोमयोः। पुरोडाशाग्नीषोमयोश्च तद्भेदे भेदः। तेषामेव सहचकारणानां यत्र भेदस्तत्र सहत्वं न भवति। यथा मित्रविंदा प्रतिकामाग्नेययोः प्रयोगवचनभेदाद्भेदः। कर्मभेदेपि भेदो भवति। यथा कस्यचित्पंचप्रयाजता कस्यचिन्नवप्रयाजता। तत्र सहत्वे इतरेत

रवैगुण्यमापद्यते। देशभेदेपिभेदोभवति। यथावरुणप्रघासेषुमारुत्याः। कालभे
देपिदर्शस्यपौर्णमासस्यचसहत्वंभिद्यते। द्रव्यभेदेपित्रयाणांत्रिसंयुक्तानांभेदः।
सहत्वेप्रधानानामंगानांतंत्रमुक्तंक्वचित्तयोःसंगतिरेवनास्ति। यथावैश्वदेवेदेशो
विरुध्यते। प्रधानानांप्राचीनप्रवणेवैश्वदेवेनयजेतेतिप्राचीनप्रवणोदेशः। तदंगा
नांचसमोदेशश्चोदकप्राप्तःसमेदर्शपूर्णमासाभ्यांयजेतेतितेनांगप्रधानानामसं
गतिरत्र। कालोपिचात्रविरुध्यते। प्रधानानांप्रसूतांतःकालस्तदंगानांपक्षादिरित्येत
दालोच्यसूत्रितं। देशकालोविरोधेनकृत्स्नोपदेशात्। कृत्स्नंत्वेतत्कर्मसांगंदेशकाले

चविधीयते इति। नत्वंगरहितस्य प्रधानस्य पृथग्वचनं। देशकालौ विरोध इत्येतत्सूत्र
मपरे अन्यथा वर्णयंति। किं प्रयोगवचनैकत्वे सति कर्मादीनि सर्वाणि सहत्वविरो
धकान्युत देशकालावेवेति। तद्भेदे भेद इत्युक्तत्वात्सर्वाणीत्येवं प्राप्तआह। देशका
लावेव विरोधिकौ न कर्मादीनि। शाखोहि सह प्रयोगः। कर्मादीनामशाद्वैनां। तेन
वैश्वदेवे कर्मभेदेपि सत्यष्टानां हविषां सहत्वं। कथं कर्मभेद इति चेत्। पयस्या
याः सान्नाय्यपयोविध्यंतेन वृधन्वंततत्राप्नोति इतरेषां पौर्णमासविध्यंतेन वार्त्र
घ्नतां शाखबलीयस्त्वात्सह प्रयोगः। द्रव्यभेदेपि शुनासीरीये परिक्रयभेदेपित्र

योगवचनैकत्वात्सह प्रयोगः। तस्माद्देशकालावेव सहप्रयोगस्य विरोधकौ।
प्रयोगवचनैकत्वे सति न कर्मादीनि। एतस्यां व्याख्यायां न कृत्स्नोपदेशादिति॥
सूत्रं पूर्वपक्षमुत्थाप्य पूर्ववद्व्याख्येयं। अस्ति ज्योतिष्टोमः तत्रोपसत्कालीनः॥
सुब्रह्मण्यानिगदः त्र्यहे सुत्यामागच्छेति स च चोदकेन द्वादशाहं प्राप्तस्तत्र च
द्वादशोपसत्कालीनान्यहानि द्वादशसौत्यानि। तत्रैतत्संदिह्यते। किं सकृत्सु-
त्याशब्दोच्चारणं। उत भेदेन प्रतिसुत्यमिति। कुतः संदेहः। यदि प्रकृतौ त्र्यहे सुत्या
मागच्छेत्यनेन सकृत्सोपलक्षणं कृतं। ततो भेदेन प्रतिसुत्यमुपलक्षणं। अथ यागसा

+न१ धर्मभूतदेवतेन्द्रस्मरणं चिकीर्षितं। ततः सकृत्सकृत्स्याशब्दोच्चारणं। किं तावत्प्राप्तं
सूत्रेणैव (पूर्व)पक्षः॥ अहर्गणे सकृद्ब्रह्मण्यायाः सर्वोपलक्षणं प्रकृतिवत्। अहर्गणेउ
पसत्कालीनेसु ब्रह्मण्यातिनिगदे। सर्वाण्यहानि भेदेनोपलक्षितव्यान्येवं प्र
कृतिवद्विकृतिः कृता भवति। प्रकृतौ त्वेकं सौत्यमहरासीसदेवोपलक्षितं त्र्य
हे सुत्यामागच्छेति। इह द्वादशसौत्यान्यहानि। तत्र च यद्येवनोपलक्ष्यते तस्यैवोप
लक्षणसंस्कारहीनत्वाद्वैगुण्यमापद्येत। तस्माद्द्वादशाहे त्रयोदशाह इत्येवमादि
सर्वेषामुपलक्षणप्राप्तमित्याह। नंत्र कालकर्मप्रत्यहमविधानात्। लुप्तविभक्ति

कोनिर्दैशास्तंत्रेणकालसंयुक्तंकर्म। सकृत्कृत्वाशब्दोच्चारणमित्यर्थः। कुतएतत्।
प्रत्यहमविधानात्। नत्वेवंविधंवाक्यमस्तिप्रत्यहमुच्चारणमिति। ननुचोदकेनवि
धानं। प्रकृतादेकंसोत्यमहस्तदुपलक्षितंत्र्याहेसुत्यामागच्छेति। विकृतौचबहू
निसोत्यानि। तानिचसर्वाण्युपलक्षयितव्यानि। अत्रोच्यते। नहिप्रकृतौसुत्यो
पलक्षणंचिकीर्षितं। नहितयोपलक्षितयाकिंचित्प्रयोजनमित्यत्रादृष्टंपरि
कल्प्यं। यागसाधनभूतदेवतेंद्रस्मरणंचिकीर्षितं। तच्चोपसत्कालीनानामन्हानि
गदद्वारेणान्यहे तीतेसुत्यांप्रतिभवतेन्द्रागंतव्यमिति। ननुचात्राप्यदृष्टमेवन

हींद्रआमंत्रणंशृणोतिनचश्रुत्वाचागच्छतीति।सत्यमेवेदं।अनेनप्रकारेण
यागसंस्तवोयं।येनसाधनान्यचेतयमानान्यपिचेतनवत्संस्तूयंते।यथाश्रो
तारोग्रावाणइति।नहिग्रावाणःशृण्वंति।संस्तवायैतदुच्यते।यथाचशृणोतु
देवःसविताहवंमइतियागःसंस्तूयंते।एवमनागच्छन्नपीन्द्रआगच्छतीवा
शृण्वन्नपिसविताशृणोतीवेतियागसंस्तवनेनचकर्तुरुत्साहसंजननमि
तिदृष्टोर्थः।स्तुत्योपलक्षणेपुनर्दृष्टमात्रैकदेशोपिनास्तीति।एकद्रव्येकर्मा
वृत्तौसकृन्मंत्रवचनंतत्वात्।यत्रैकद्रव्यविषयःकर्मणोभ्यासःतत्रकिंप्रति

क्रियं मंत्राभ्यावृत्तिः। उत्तस कृन्मंत्रवचनमिति। क्रियाभ्यावृत्तौ तच्छेषस्य मंत्र
स्याप्यावृत्तिप्राप्तौ सत्यामुच्यते। एकद्रव्यविषयेकर्मणोभ्यासे सकृन्मंत्रो वक्त
व्यः। कुतए तत्। कृतत्वादभिधानसंस्कारस्यापिच। साभ्यासाएकैवेयं क्रिया
श्चैच मंत्रवचनमुक्तं। उक्तेन न्यायेन हविषो ग्रहणे बर्हिषो लवने तस्यैव स्तरणे।
आज्यग्रहणेच सकृन्मंत्रवचने प्राप्ते आह। नग्रणलवनस्तरणाज्यग्रहणेषु
तु। तुशब्दो वधारणे। ग्रहणादिषु नैव सकृन्मंत्रवचनं। नत्वत्राभिधानसं
हविर्ग्रहणे
स्कारस्य कृतत्वमस्ति। ग्रहणे तावद्यावद्देवमंत्राभिधानेन संस्कृतमन्यद्कृत्वा।

१ बर्हिर्देवसदनं दामीति तैत्तिरीये बर्हिः छेदनमंत्रः सप्रतिबर्हिर्मुष्टिछेदनं प्रयोक्तव्यं। माध्यंदिनानां तु मंत्रानुपदेशात्तुष्णीं बर्हिः छेदनं। अत्रानुपयुक्तमपि बर्हिः छेदनमंत्रावृत्तिकथनं न्यायप्रदर्शनार्थं। वेदेः स्तरणे च न सकृन्मंत्रः आज्यग्रहणे च॥१

माणमभिधानसंस्कारसव्यपेक्षमेवेति। लं वणस्तरणयोरप्येवमाज्यग्रहणे च। वच
नादाज्येमुष्टौ चोत्तमे। आज्ये वाचनिकी मंत्रनिवृत्तिरुक्ता। उत्तरेषु ग्रहणेषु। त्रिस्त्रि
रेव यजुषा गृह्णीयात्रिवृद्धि यज्ञ इति। तदनु सकृत्सकृदेवेति। मुष्टौ चोत्तमे तूष्णीं चतु
र्थमिति। दीक्षितस्यामनोज्ञस्वप्नदर्शने मंत्रवचनमाम्नातं। तथा नदीतरणेऽव
वर्षणे मेध्यदर्शने प्रयाणे च। तत्रैतत्संदिह्यते। किं युगपदनेकामनोज्ञस्वप्नदर्श
ने सकृन्मंत्रवचनमुत भेदेनेति। तथा नदीतरणेपि च। स्रोतःसंभेदे भेदेन मंत्रव
चनं उत सकृदिति। अववर्षणेपि च युगपदनेकधारासन्निपाते किं प्रत्यव

षेणं मंत्रवचनमुत सकृदिति। एवं युगपदनेकधा मेध्यदर्शने वनीवाहने प्रयाणेपि च
किं प्रतिप्रयाणं मंत्रवचनं उत प्रथमे प्रयाणे इति। तत्र प्रत्येकं मंत्रवचने प्राप्त आह॥ स
म्र नदीतरणावर्षणामेध्यदर्शनप्रयाणेषु तु सकृत्कालद्रव्यैकार्थत्वात्। यथासंभवं हे
तुविभागः। अनेकस्य दर्शने कालैकत्वात् सकृन्मंत्रवचनं। नदीतरणे द्रव्यैकत्वात्।
स्रोतसां भेदेप्येकमेव नदीद्रव्यमिति सकृन्मंत्रः। अववर्षणेपि कालैकत्वात्। तथा
मेध्यदर्शने प्रयाणेषु तु एकार्थत्वात्। एक एवायमर्थो गमनं नाम तस्यादावेव मंत्रवच
नं। न प्रतिप्रयाणमिति। अथ यत्र कालभेदेन पुनस्तदेव निमित्तमापतति। तत्रापि किं

ऽ चा॥ सकृद्वचनं तुल्यभेदेनेति। अभिहितमेव तत्तदिति कृत्वा सकृन्मंत्रवचने प्राप्त आह। ननि
मित्तभेदात्। नात्र सकृन्मंत्रवचनं विद्यते त्यत्र [illegible]चमिति कृत्वा मंत्राभ्यावृत्तिः। अ
प्रधानकालत्वेः सकृत्सन्निपातात्। अप्रधानकालीनं यदंगं यथा आधानं तस्य प्रति
कर्म प्राप्तौ सत्यामुच्यते। सकृत्कर्त्तव्यं। नहि तत्र कश्चित्कर्म [illegible] विशेषे संनिपततीतं।
यस्यापवर्गे प्रवृज्येत। अतः स्वकालत्वात्सकृदेव कर्त्तव्यं। यूपसोप्याग्न्याधेयवद्द्रष्ट
व्यः। सोप्यप्रधानकालीन एव व्रीहीन्सासु यूपं छिनत्तीति। तस्मात्सोपि साधारणः प
शुत्रयेति। नन्वग्न्याधेयाधिकरणन्यायेनैव गतार्थत्वादवाच्यमेतत्। पशावृत्तौ वैयू

पमुच्छ्रयंतीत्तिप्रत्ति पशुप्राप्त्याशंकानिवृत्त्यर्थमनिर्देशः। स्वरूश्चसंस्थावचनात्।
स्वरूरपि यूपवदग्नीषोमीयसवनीयानूबंध्यानांसाधारण एवं कृत्त एतत्। संस्थाव
चनात्। संस्थावचनंहिभवत्ति। स्वरूहोमेनहियूपः संस्थाप्यतइत्ति। यदिचप्रथम
मेवहूयत्ते तदायूपसाधारणे नभवेत्। तस्मात्सोपियूपवत्साधारणः। तंन्निर्दिशत्ति।
अपिच। तत एव यूपात्स्वरूर्निर्वर्त्स्यते। तस्ययः प्रथमः शकलः परापतेत्तंस्वरूंकार्य
र्यइत्तिसमामनंत्ति। दर्शपूर्णमासादिषुकर्मसुचिंत्यत्ते। किंसर्वंस्वयमेवकर्त्तव्यंउत
तर्हिकिंचित्परकर्त्तृकमपीत्ति। फलार्थिनः कर्मचोदितमतस्तेनैवसर्वंकर्त्तव्यमिसे

क॰भा॰१
पु॰

वंशात्ते आह। कर्मणि पुरुषाणां। अधिकारः। कुत एतत्। परिक्रयाम्नानात्। दृश्यते हि
तत्र परिक्रययोगो दक्षिणाहिरण्यं दक्षिणे त्येवमादि। एवं सर्वत्र प्राप्ताविदमुच्यते।
प्रधानं स्वामी फलयोगात्। यत्प्रधानं स्वद्रव्यपरित्यागसन्तोषादनरूपं तत्स्वामी
करोति। फलयुक्तं हि तदिति। तच्च कुर्वन् फलेन युज्यत इति। एकसूत्रमेवेदमप
रे अन्यथा वर्णयन्ति। परिक्रयाम्नानात् सर्वत्र पुरुषाणां कर्त्तृत्वे सति प्रधानं स्वा
मी करोति। फलयोगादित्युक्तमेव। किमेतदेव स्वामी करोति नेत्याह। पुरुषयोगि
मंत्रसंस्कारयोस्त्यागे सामर्थ्यात्। पुरुषयोगियो मंत्रः। तनूपा अग्ने सि तन्वं मे पा

पु॰

हि ह्त्येवमादि प्रत्यगाशीर्युक्तः। यश्चात्मसंस्कारः पावनमुंडनादिः। तौ द्वावपि त्यागे
प्रतिपत्तव्यौ। त्यागशब्देन च त्यागाधिकृतो लक्षणया यजमानोऽभिधीयते। यजमा
नयोगिनौ भवत इत्यर्थः। यजमान एव हि समर्थः आशीः प्रार्थनं कर्त्तुं। संस्कारे
पि च फलप्रतिग्रहयोग्य एव। वचनादन्यत्। अन्यद्वचनाद्यजमानस्य भवति। यथा
शुक्रं यजमानोन्वारभत इति। ऋत्विजामपि वचनेन संस्कारो भवति। यथा हिरण्य
मालिनो वाजपेयेन चरंतीति। शेषमितरे यथासंख्यं। इतरे स्वामिव्यतिरिक्ताः शेषं
उपवीतमपचारे स्मार्त्तेमनादिष्टप्रायश्चित्ते स्मृतिग्रहणात्
यथासंख्यं कुर्वंति। येयास्याख्येति। उपवीतिनः। कुर्वंति स्मृतेः। प्रांच्युदग्वा। प्रांच्यु

प्रागुदगपवर्गे श्रौतमनादिष्टं प्राय
श्चित्तं श्रुतिग्रहणात्॥

दंचिचकर्माणि संतिष्ठेरन्निति श्रुतेः। आवृत्तिसामंतेषु प्रदक्षिणं। आवृत्तौ सामंते
स्मार्तमनादिष्टं
च प्रदक्षिणं स्मृतेः। विपर्यस्य पित्र्येषु सकृद्दक्षिणा च। पित्र्येषु कर्मसु विपर्यासेनाप्र
दक्षिणं कार्यं। सकृच्च। यदभ्यस्तरूपं दैवे स्मर्यते। तत्पित्र्ये सकृत्कर्त्तव्यं। यथापरि
समुत्थ्योपलिप्योल्लेखनं। दक्षिणा च दिक्। न प्राच्युदीची वा। प्रधानद्रव्यव्यापत्तौ
सांगावृत्तिस्तदादेशात्। प्रधानस्य च यत्साधनं द्रव्यं तस्य व्यापत्तौ विनाशे सांगावृ
सान्नेषु होमप्रकारकाणि गार्हपत्यादीनि दृष्टार्थानि
त्तिर्भवति। तेन त्यादिष्टान्यंगानि तद्विनाशाच्च विनाशमुपगतानि। अपरेन्यथा
दृष्टार्थग्रहणादिभिः   अदृष्टार्थैराघारादिभिः
वर्णयंति। द्रव्यमेव संस्पर्शिभिरंगैः सहावर्त्तते नारादुपकारकैरपि। तेन तत्तान्यैर्दि

ष्टानीत्यकृत्कार्थे। इदंश्रूयते व्रीहिभिर्यजेत यवैर्वा यजेतेति। तत्रैतत्संदिह्यते। किमु
भावपि व्रीहियवौ यागं प्रत्यंगभावमुपनेयौ। उत विकल्पेनेति। किं तावत्प्राप्तं सूत्रे
णैव पूर्वपक्षः॥७॥ गुणानामेकार्थानां सर्वारंभश्चोदितत्वात्। ये गुणा एकप्रयोज
नाः यथा व्रीहियवाद्यस्ते सर्वैः स्तत्कर्मारब्धव्यं। कुत एतत्। चोदितत्वात्। चोदि
ता हि ते यागाभिनिर्वृत्ताविति। य एव गुणोंगभावं नोपनीयते तावत्स्वैव श्रुतिरनर्थि
कास्यादित्येवं प्राप्ते ब्रूमः। नकृतत्वात्। नैतदेवं सर्वैस्तत्कर्मारब्धव्यं। किं कारणं।
कृतत्वात्। एकेनैव यस्मात्तत्कर्माष्टाकपालाभिनिर्वृत्तिरूपं निर्वर्त्तितं भवतिन

क॰भा॰१

६२

राद्वितीयोपादानमनर्थकं स्यात्। सर्वे हि ते इतरेतरनिरपेक्षा एव विधीयंते। अथ
यद्येके नैव निर्वर्त्तिते यागे द्वितीयश्रुत्यनुग्रहाय यागाभ्यावृत्तिः क्रियते। तत्रैतदु
त्तरसूत्रं। अनारभ्यत्वात्। अनारभ्यो यमर्थः। यदुत गुणानुरोधेन प्रधानाभ्यावृ
त्तिः तस्माद्विकल्पः। दर्शनाच्च। दृश्यते चायमर्थो यथा व्रीहियवयोर्विकल्प इति।
हविरुद्वपनं प्रकृत्य श्रूयते। वर्षवृद्धा उ त्ये वैते यदि व्रीहयो यदि यवा इति। अ
पि च। समुच्चये सति न व्रीहिभिः कृतो भवंति न यवैरिति। संकीर्णमन्यदेव द्रव्यां
तरं भवति। श्रुत्यानर्थक्यमिति चेत्। इति चेत् सत्यपि व्रीहियवयोरेवान्यतरस्य वि
। अन्यदेवमीमांसकानां विशिष्टस्य अर्थांतरत्वात्। व्रीहियवव्यतिरिक्तमपीसमर्थः। तत्र्यो श्रुतत्वाद्यागसाधनं। तथा च भट्टाचार्यकारिका। मिश्रैर्वा
यजमानस्य मिश्राणां विध्यसंभवात्॥ नैव व्रीहिभिरिष्टं स्याद्यवैर्वापि यथाश्रुतैरिति॥

६२

कल्पेनान्यतरस्य श्रुतिरनर्थिका स्यात्। कालांतरेर्थवत्त्वं स्यात्। कालांतरे
हितीया श्रुतिः सार्थिका भविष्यति। न त्वेकस्मिन्कर्मणि समुच्चयः संभवती
त्येतदुक्तं। आघारे प्रकृत्य गुणाः समाम्नाताः। ऋजुमाघारयति संततमा
घारय [illegible] ति दीर्घमाघारयति प्रांचमाघारयति। तेषामेककार्यत्वादुक्तेनन्या

श्रीहियव ४

येन विकल्पे प्राप्ते आह। धर्ममात्रेषु समुच्चयो विरोधे। ये गुणा धर्ममात्रास्तेषां स

अदृष्टार्थाः ५

मुच्चयः। कुत एतत्। अविरोधे हि ते वर्त्तंते। कथं। ऋजुं संततं न विरुणद्धि। न च
संततं दीर्घं न च प्रांचं प्रतिनियतानि त्वदृष्टानि। तस्मादृज्वादीनां समुच्चयः। न
कर्मणः क्षणिकस्य दीर्घेण मंत्रेण रतं इन्द्र इत्यादिना न सामसंभवः। अतो दीर्घत्वस्याप्यायमान द्रव्यस्य साम समुच्चयते ॥ अतो
न्यत्रापि मंत्रांतकर्मा योरेव समन्वयाताः २

कं·भा·१
६३

मुख्यं आधारमिष्यतिलक्षणं

नूक्तमेककार्यत्वादिति। सत्यं परमेकं कार्यं। अवांतरकार्याणि तु भिन्नानि। य
द्यजुना क्रियन्ते। न तत्संततेन। यत्संततेन तद्दीर्घेण। न तत्त्वांचेति। होत्राधानयोः क्रि
यमाणानुवादिनामग्निमंथनप्रणयनादिषु होतृकाणां आधानमंत्राणां च भू
र्भुवः स्वरिति किमेषां समुच्चय उत विकल्प इति। मंत्राणां क्रियाभिधायकत्वं तत्सा
धनाभिधायकत्वं च दृष्टं प्रयोजनमिति विकल्पे प्राप्ते आह। होत्राधानयोः होतृ
काणां मंत्राणां अधस्तनसूत्रोपात्तः समुच्चयोनुरुध्यते। यत्कारणमदृष्टार्थो हि
ते क्रियमाणानुवादिनः। करणमंत्राणां तु विकल्प इष्यते। दृष्टार्थत्वात्। क्रियमा

उभयस्य चान्यतरस्मादतो ये क्रियमाणानुवादिनो होत्रमंत्राः। क्रियमाणानुवादित्वं सर्वेषु णां क्रियमाणस्य कर्मणः स्मरण
निश्चेदार्थः। अस्मिन्नर्थे ... नादेवस्थितरहितसर्वेषां समुच्चयः॥ यामाः अदृष्टमंत्राणां समुच्चयः। दृष्टकरणमंत्राणां विकल्पमरतिबीजं

६३

ऐंद्राबार्हस्पत्येदर्शयित्वे याज्यानुवाक्ये पुरस्तादे समाम्नाते ॥ ऐंद्राबार्हस्पत्ये हविः। अयं वां परिषिच्यत इत्येकं युगलं। अस्मे इंद्राबृहस्पती।
बृहस्पतिर्नः परिपासि सपरे। तत्र समुच्चयविकल्पसंशये। यथा याज्यानुवाक्ययोः समसंख्यत्वेनोपलक्षणात् मिथः समुच्च
स्तथा युगलयोरपि स्यादिति विशेषाद्धितिप्राप्ते। उच्यते। विकल्प एकार्थत्वादिति। याज्यापुरोनुवाक्ययोः पुरोनुवाक्यासमा
ख्यावशात्याय प्राप्त विकल्पबाधेन समुच्चय इति विशेषः ३

णानुवादिस्त्व दृष्टार्थो इति समुच्चयः। आधानमंत्राणां तु समुच्चयो वाचनिकः।
त्रिभिरक्षरैर्गार्हपत्यमादधाति पंचभिराहवनीयमिति। सर्वत्र होतृकाणां समुच्च
येप्राप्त आह। नयाज्यानुवाक्यासु विरोधात्। एकस्मिन्प्रकरणे याज्यानुवाक्या
लक्षणयुक्तानां न समुच्चयो भवति। देवतास्मरणार्थो ह्यनुवाक्या। हविः सम
र्पणार्थो च याज्या। अतो दृष्टार्थत्वाद्विकल्पः। तथा चाह। हूयति चानुवाक्या याप्र
यच्छति याज्ययेति॥ दर्शनाच्च। दृश्यते चायमर्थो यथा याज्यानुवाक्यासु न समुच्च
यं। प्राजापत्यान्प्रकृत्यामनंति। एकानुवाक्या भवत्येका याज्यैकदेवत्या हीति दे

यानि प्रायश्चित्तानि कर्मवैगुण्ये निमित्ते विधीयंते। यथा यदि मे यशआर्तिमियात् भुः स्वाहेति गार्हपत्ये जुहुयात्॥ यो मावास्यां पौ
र्णमासीं वातिपातयेद् [illegible] निर्वपेत्॥ आमावास्यां पौर्णमासीं वातिपातयेद् आग्नेयमष्टाकपालं निर्वपेदि
त्यादि वैगुण्यसमाधिप्रायश्चित्तानि [illegible] याज्येकस्मिन्नैगुण्ये विधीयंते। पथिकृते आग्नेयादीनि। तेषां विकल्पसमुच्च
यचिंतायामदृष्टार्थत्वात् समुच्चयप्राप्तावेकैकेन कर्मवैगुण्यसमाधानाय निरपेक्षविधानात् विकल्पः ५॥

वतेकत्वं हेतुं ब्रुवन् याज्यानुवाक्ययोरेकत्वं च प्रदर्शयति। तथा पितृयज्ञे पुरो
नुवाक्यां प्रकृत्याम्नन्ति। एकया वै देवानन्वाक्यावयंति द्वाभ्यां पितॄनिति। अनु
वाक्याद्वित्वविधिपरे वाक्ये एकत्वं दर्शयति। प्रायश्चित्तेषु दोषनाशात्। एकस्मि
न्कर्मणि प्रायश्चित्तबहुत्वे आम्नाते किं समुच्चय उत विकल्प इति। विकल्प इति
ब्रूमः। कृतो दोषनिर्घातार्थं हि प्रायश्चित्तं भवति। दोषदर्शने हि सति तदाम्नाय
तेन ततस्तन्निर्हतिरेव प्रयोजनं तेन च विकल्प्यते एकेन च निर्हते दोषे द्वितीयमन
र्थकमित्येवं प्राप्त आह। नास्तुतेः। प्रायश्चित्ते कृते दोषः प्रयातीति नैवं श्रुतिरस्ति।

यामिर्पुनर्दोषनिर्घातार्थानि मिमिते कर्माणि भिन्ने जुहोतीत्यादीनि तेषां प्रयाजादि दिवदपर्यायनिधानाहमुच्चयः॥२ यदन्तो यज्ञ आर्ति मियात् भूः स्वाहेति गार्हपत्ये जुहुयात् २

प्रत्यक्षाच्च। प्रत्यक्षेणापि दोषनिर्घातो न दृश्यते। भिन्ने जुहोतीति स्कन्ने जुहोती
ति। कृतेपि होमे न भिन्नमभिन्नं भवति। न च स्कन्नमस्कन्नं। अतो धर्ममात्रं तस्मा
त्समुच्चयः। स्यादृष्टदर्शनात्। भवेदृष्टः केषुचित्प्रायश्चित्तेषु दोषनिर्घातार्थता यथा
महाव्याहृतिहोमेषु। दोषनिर्घातो ह्यत्र दृश्यते। स यथा पर्वणा पर्व संदध्यादेव
मेवैवमसं संदधाति य एताभिर्भिषज्यतीति संधानं भैषज्ये दर्शयत्येवं प्राप्त आह॥
नान्यार्थत्वात्। नैतदेवं संधानं भैषज्ये दृष्टा विकल्प इति। किं कारणं। अन्यार्थत्वे
ते। किमर्थे इति चेत्। महाव्याहृतिस्तु त्वर्थे इच्छन्नाम प्रशस्तो महाव्याहृतिहोमो

अदृष्टार्थं॥२

। नहि ... प्रत्य
मा अपितु विध्येयं स्तुतं।

येन संधानभेषज्यं क्रियते। तस्मादृष्टार्थत्वं। इदानीमिदं विचार्यते। कर्मणि प्रयुज्य
मानानां मंत्राणां किं यथाम्नातस्वरेण प्रयोग उत भाषिकस्वरेण भाषिकस्वरो ब्राह्म
णस्वरः। आहोस्विदेकश्रुत्या तानेनेति किं तावत्प्राप्तं। सूत्रेष्वेव पक्षः। मंत्रे स्वर
क्रिया यथाम्नातमविशेषात्। कर्मणि प्रयुज्यमाने मंत्रे आम्नातस्वरेण प्रयोगः।
कुत एतत् अविशेषात्। न विशेषोवसातुं शक्यते। अनेन स्वरेणानेन वा प्रयोग इति
तस्मात्समाम्नायस्वर एवं प्राप्ते आह। भाषिकस्वरो वोपपन्नमंत्रोपदेशात्। वाश
ब्दः पक्षव्यावृत्तौ। भाषिकस्वरो वा भवति॥ ब्राह्मणस्वरः न मंत्रस्वरः। कुत एतत्।

इदानीं मंत्रप्रयोगस्वर
निर्णयः ३

आ...न्यूंखसामसु। एकश्रुति संततमनुब्रूयादुदात्तानुदात्तस्वरितानां परः सन्निकर्ष ऐकश्रुत्यं॥ अस्यार्थः। ऐकश्रुत्यलक्षणमुच्यते। उदात्ता
नुदात्तस्वरितानामभिव्यंजकायत्नप्रयत्ना आयामविश्रंभाक्षेपास्तेषामन्यतमस्यैकस्यैवान्यतः सन्निकर्षणासजातीयप्रयत्नाभ्यवधानेन यदुच्चारणं तदैकश्रु
त्यमित्यर्थः॥ ४

उपपन्नस्वरस्यैव मंत्रस्य विद्यमानस्वरस्य ब्राह्मणे स्वरांतरेणोपदेशो भवति।
तस्माद्भाषिकस्वर इत्येवं प्रामेदुच्यते। तानो वा नित्यत्वात्। वा पै शब्दः प्रस्तांत
रपरिग्रहे। नैतदस्ति यद्भाषिकस्वर इति। तानेन प्रयोग एकश्रुत्या प्रयोग इत्यर्थः।
कृत एतत्। स्मर्यते ह्येवमेकश्रुति दूरात्संबुद्धौ विति वर्त्तमाने यज्ञकर्मण्यय
जपन्युंखसामसु। एवमादिवर्जितानां मंत्राणां यज्ञकर्मणि एकश्रुत्या तानेन
प्रयोगः। ननु चेयं स्मृतिः। श्रुत्या च मंत्रप्रयोगः स्वरांतरेणोच्यते। नैव श्रुते
र्मंत्रप्रयोगार्थतां तं प्रपद्यस्व रुप्रथा उरु प्रथा उरु प्रथस्वेति प्रयोगवचनेनो

पसंगृहीतत्वात्। लिंगेन प्रथने प्राप्नोत्येव तत्र श्रुतिरर्थवादार्था। उरु ते यज्ञपतिः
प्रथतामिति। प्रशस्तमेतस्य प्रथनं येन यज्ञपतिरपि प्रजया पशुभिश्च प्रथत इति।
अपि च नित्यास्मृतिरविच्छिन्नपारंपर्यात्। अथवा नित्यत्वादिति। नित्यं वैदिकं
वचनं स्मृतीनां तन्मूलमिति। एवं च स्मृतेर्नित्यत्वं। आधाने श्रूयन्ते षडेया द्वादश
देया इत्येवमादि। तत्र संदेहः किं दानसंयोगे संख्या विकल्प्यंते। उत समुच्चीयत
इति। सर्वासामाम्नातत्वात्समुच्चये प्राप्ते आह। संख्याविकल्पो दानसंयोगेरु
तत्वात्। दानसंयोगे या संख्या श्रूयन्ते सा विकल्पेन भवितुमर्हति। कुत एतत्॥

पशुश्चेयाः संख्या नरोप
मर्चनात् श्रुतसंख्याहा
नि प्रसंगात् ३

एकेन संख्याविशेषेणानस्यार्थस्य निर्वर्तितत्वात्। अनेन त्वर्थे चैतद्दानं न धर्ममात्रं। सए
षपत्तो हृतो नरदक्षेतं देवा दक्षिणाभिरक्षयन्निति प्ररूसामनंति। तावैषडृघादिये
वमादि। अस्त्यग्नीषोमीयः पशुस्तत्र श्रूयते। वृभरूवध्यमवद्धाति। वसां जुहो
ति। अध्यूध्नीं होत्रे प्रयच्छति। वनिष्टुमग्नीधे प्रयच्छति। तच्चचोदकेन पंच पश्वादि
पशुगणे प्राप्तं। तत्र संदेहः। किमूवध्यादीनां समुच्चय उत विकल्प इति। किं तावत्
त्प्रतिभाति। एकेनैव द्रव्येण तस्याः क्रियाया निर्वर्तितत्वाद्विकल्पे प्राप्ते आह। ऊव
ध्यवसाध्यूध्नीवनिष्टुषु समुच्चयो द्रव्यसंस्कारतद्देशाभ्यां। ऊवध्यादिषु समुच्चयो न

२ ऊवध्यं पुरीषं। वसोपपक्वमांसस्रावितं जलं। अध्यूध्नी ऊधस्य प्रदेशो वयोपरि स्थलके संलग्नमुदरमांसमिति। ३ श्लोकः। उर्जरास्तुशातपुष्टमा
ऊवनिष्टुयातपुष्ठ ५ श्लोकौ। गुर्जरास्तु स्थूलांतरमाहुः २

विकल्पः। कुत एतत्। द्रव्याणि हि तया क्रियया संस्क्रियंते प्रतिपाद्यंते। नात्र द्र॰
व्यं क्रियार्थं क्रिया एव द्रव्यार्थेति क्रिया निर्वृत्त्युत्तरकालं चरितार्थस्य द्रव्यस्य प्रतिपत्तिः
संस्कारः संस्कार्याणि भिन्नानि। यस्यैव पशोः शेषसंस्कारो न क्रियते। तस्यैव संस्का
रहानाद्वैगुण्यमापद्यते। तस्मात्समुच्चय इति। भूतभव्यसमुच्चारणन्यायेन द्रव्यम
न्यत्र क्रियार्थे एकेनैव च क्रियायां निर्वर्त्तितत्वान्न द्वितीयेन प्रयोजनमिति। ज्योति
ष्टोमे क्रयं प्रकृत्याम्नायते। हिरण्येन क्रीणाति। वाससा क्रीणाति। गवा क्रीणातीत्ये
वमादि। तत्रैतत्संदिह्यते। किं क्रयचोदना गुणेषु समुच्चय उत विकल्प इति। किं ता

श्रीहृयवाय्येमवा ७

वस्राप्तं। इतरेतरनिरपेक्षत्वाद्दक्षिणासंख्याविकल्पवत्त्वं विकल्पप्राप्ताविदंमौवि
द्रमाह। चोदनागुणेषु च प्रकॢप्तुपवंधाभ्यां। अथस्तन सूत्रोपात्तसमुच्चयार्थश्च
शब्दः। क्रयचोदनागुणेषु समुच्चयो न विकल्पः। प्रकॢप्त एव हि सोमे विद्यमाने
कर्ममध्ये क्रयश्चोदितस्तेनास्य धर्ममात्रत्ता। न त्वयमप्राप्तस्य सोमस्य परिप्रा
पणार्थः। धर्ममात्रत्वाद्यथाचोदितः कार्यः। चोदनाच सर्वद्रव्याणां। तस्मात्समु
च्चयः। अपि च संख्यैव पद्यते। तं वै दशभिरेवक्रीणीयान्नाद्दशभिरिति। गार्हपत्या
हवनीयोनव्यवेयात्। अर्थलक्षणेषु संचरणेषु। विवृत्तावृत्तवेतरथावृत्तिः। विव

अस्य परिक्रयो यो तिष्ठोमे द्वादशशतं। दर्शपूर्णमासयोरन्वाहार्यः। तत्र संदेहः। किमध्वर्युणा परिक्रेतव्याऽहोस्वित् स्वामिनो इति। किं तावत्प्राप्तं। समाख्यानादध्वर्युणा इति प्राप्ते ब्रूमः। स्वामि कर्मैव परिक्रयः कस्मात् कर्मणस्तदर्थत्वात्। फलकामो हि यजमानः यश्च फलकाम स तेन स्वयं क्रेतव्यं स यदि क्रीणाति ततः स्वयं सर्वं करोति इति गम्यते॥ अथ न परिक्रीणीते॥ न सर्वं कुर्यात्। तस्मात् स्वामी परिक्रीणीते॥ =

र्त्तनं अप्रदक्षिणं। आवर्त्तनं प्रदक्षिणं। एते शास्त्रतः कृत्वा इतरथावृत्तिः कार्या। अतीत्य निःक्रमणं। यत्र संचरणमार्गो वा शास्त्रस्याविष्टः। यथान्तरेणाप्रराग्नी गत्वा व्रतग्रहणे। तत्र तस्य दार्थो भिनिर्वृत्य कृत्तरकालमतीत्य तेनैव मार्गेण निष्क्रमणं। उत्तरत उपचारो यज्ञः। उत्तरत उपचारो वै यज्ञ इति श्रुतेः। अनियतदेशस्य कर्मणो देशोऽयं। दक्षिणतो ब्रह्मयजमानयोरासने। भवतः। ब्रह्मा वै यज्ञस्य दक्षिणत आस्ते इति वचनात्। अथाहैवेवत्तु लाय दक्षिणो वर्धंत इति प्रवृत्यत्तस्माद्दक्षिणं वर्धंतमधिस्पृश्येवासीतेति। यश्चा यजमानो वेदिस्पृक् ब्रह्मणः पश्चाद्यजमा

(interlinear note above line 4: विहारस्य)

णो वेदिसंलग्न आस्ते। अध्वर्युः कर्मसु वेदयोगमात्। अध्वर्युवेदविहितस्य कर्मणश्च
त्वार ऋत्विजः कर्त्तारः। तेषामनाम गृहीत कर्तृके कर्मण्यध्वर्युः कर्त्ता कुत एतत्। वे
दयोगात्। अध्वर्युणा हि वेदो युज्यते। समाख्यायते अध्वर्युवेद इति। यदि तर्हि दविहि
तानामध्वर्युः कर्त्ता तदैतदुपपद्यते। वचनविरोधाभ्यामन्यः। तद्यथा प्रतिप्रस्थाताऽमं
थिने जुहोतीति वचनात्। विरोधादपि पिपेषणोपधान योर्युगपद्विधानेऽग्नीत्। हवि
ष्यात्रस्याग्न्यृत्विजां। समावेशे सूत्कृत्तरमुत्तरं बहिर्भवति। पूर्वपूर्वमंतरं भवति। ऋत्वि
जां च यथापूर्वं समावेशे सत्यकृत्तरत्तरं बहिर्भवति। पूर्वपूर्वमंतरो भवति। नवांचोदितत्वा

त्। न वायमंतर्वेहिर्भावो भवति। न ह्यस्य आत्मणे चोदनेति। एवमभिहिते पुनराबीते न व्याख्यायते। अचोदितत्वात्। नायमंतर्वेहिर्भावः स्याद्यदि न स्मर्यंते। स्मर्यंते च। तस्मा द्वस्येवेति। गार्हपत्ये संस्काराः। प्रतपनादयो भवंति। अपणं वा हवनीये वा भवति। गा + आहवनीये द्

हिपत्ये वा एवमेव वहिः श्रूयते। आज्येन यूपं समनक्तीति श्रूयते। तत्रैतच्चिंत्यते। किमा ज्यशब्दः संस्कारनिमित्त उत जातिनिमित्त इति। किं तावत्प्राप्तं। प्रयोगप्राचुर्यात्संस्कारनिमित्त इत्येवं प्राप्त इदमाह। घृतं ... लिंगात्। आज्ये चोदिते घृतं प्रतीयात्। जातिनिमित्त आज्यशब्दो न संस्कारनिमित्त इति। असंस्कृतेपि हि यागोद

आतपास्राहवनीयेपि इवि ... मवाये इति ... तो मा हि पत्ये च श्रपयंतीति च

श्यते। कथंमाज्यंक्षीणमाज्यंतैलमुपसेचनंवर्त्तते। नन्वयमेकदेशप्रयोगः। स
त्यमेवं एकदेशप्रयोगोपि वाचकशक्तिमंतरेण न भवति। लिंगाच्च। लिंगंचा
स्यमेधेत्रत्वो हतंप्रकृत्सभवति। यदाज्यमुच्छिष्यते। तेनरश्मनामभ्यज्यादित्तइ
ति। असंस्कृतेप्याज्यशब्दप्रयोगो भवति। अपरेलिंगादितिवर्णयंति। लिंगात्
द्व्यमेवभवति। आज्यनिर्वापंप्रकृत्यामनंति। महीनांपयोसीति। मत्यइतिह
वाएतासामेकंनामय दुघामिति। तस्यहोमोनादेशे। तस्येत्सवयवल्लक्षणाषष्टी।
द्व्यांतरस्याविधानेत्तेनहोमः कर्त्तव्यः। चत्वालात्पुरीषं। यज्ञकर्मणियत्पुरीषंत

त्

आत्वाला ह्लात्यं। आहवनीये जतयो ध्रुवायाः। सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रु
वायामाज्यमिति वचनात्। तत्र केचिदुपस्तरणाभिघारणे अपि ध्रौवाज्यादिच्छं-
ति। उपस्तरणाभिघारणे अपि यज्ञसाधने एवेति। तत्पुनरयुक्तं। द्यवदानसंस्का
रके त्वेते। न यज्ञसाधने। कुत एतत्। उत्पद्यमान एवायं यागोष्टाकपाल साधनक
एवोत्पन्न आग्नेयोष्टाकपालो भवतीत्यनेन। तत्रान्यद्द्रव्यांतरं न विकल्प्यते। न
समुच्चीयते। न चैवैपरीत्येन बाध्यबाधकभावेन वाभिसंबध्यते। उत्पत्तिगुणविरो-
धात्। अतो द्यवदानसंस्कारोयं। तथा चाह। स० आज्यस्योपस्तीर्य द्विर्हविषो वद्य

याधो परि ष्टादाज्यस्याभिघारयति। सैषाज्येन मिश्राहुतिर्हूयत इति मिश्रणत्वेना
ज्यमभिधीयते। न याग साधनत्त्वेनेति। अप संस्कारकाण्यपि ध्रौवादगृह्यं
ते। तदानीं पुरोडाशाभिघारणोपस्तरणप्रायादानादीन्यपि तत एव प्राप्नुवंति।
अस्तु तथेति चेत्। न। स्यात्स्यानर्थक्यात्। इडाप्राशित्राघारांश्चैके। ध्रौवादेके
इच्छंति। तत्रापि हि यज्ञसंशब्देन भवति। पाक यति या एव चा एत दिडया चारि
पुरितीडायां। तथा प्राशित्रं प्रकृत्यामनंति। तद्यथैव यस्सस्यावदानमेव तदिति।
शिरो वै यज्ञस्यैतयोरन्यतरस्याघारयोरिति यज्ञसंशब्देनं भवति। एके तन्त्रे छंति। अ

यज्ञत्वात्। औपचारिकाण्येतानि यज्ञसंशब्दनानि। आंचाचाघारौ। होतव्यौ।
विद्दिशावेके। जुहोति। आहवनीये होमाः श्रुतिसमाख्यानाभ्यां। यदाहवनीये
जुह्वतीति श्रुतिः। आएतस्मिन्हूयत इति समाख्याने। जुह्वावचने। अवच
नेन्यस्य होमार्थस्य द्रव्यस्य जुह्वा होमः कर्त्तव्यः। कुत एतत्। समाख्यानात्। हू
यत्ते ऽनयेति जुहूः। एतच्च दर्शपौर्णमासप्रकरण एवत्तद्विध्यं तत्र आहके स्रुच। तत्रै
व जुहूर्दृष्टेति॥ सकृद्गृहीताद्वावास्तेः। तेन होमः कर्त्तव्यः। सकृद्गृहीत्तेनैव हि हो
मार्था भिनिर्वृत्तिरवासा भवतीति। किंच। अवदानाद्विरातिरेकाच्च। आवदानादास्वा

हुतिषु द्वितीयमेवावदानमतिरिक्तं ज्ञापयति। कथं। तद्धि चतुरवत्तं भवतीदं वा
क्याय याज्यायै वषट्काराय यस्यै देवता चतुर्थी यस्यै देवतायै हविर्भवतीति प्रकृत्या
ह। अतिरिक्तं द्वेहतरदवदानं यत्संचममिति। तेनावषट्कारस्वाहुतिष्वनुवाक्यं घ
भावाद् द्वितीयमेवावदानमतिरिक्तमिति ज्ञापितं भवति। तथा यच्चतुरन्नैषीद्धि
रहोषीरथके ते द्वे आहुती इति द्वयोरतिरिक्ततां दर्शयति। व्रीहीन्यवान्वा हविषि।
ध्रस्यद्विरवद्यति॥ हविषि चोदित्ते व्रीहीन्यवान्वा प्रतीयात्। तस्य सकलस्यैव देवतोद्देशेन गृहीतस्य
होमे प्राप्ते वचनाद् द्विरवद्यति। त्रिर्जमदग्नीनां। जमदग्नीनां त्रिरवद्येत्। पंचावत्तं

जमदग्नीनामिति वचनात्। पश्चात्तृतीयं। अवरेयं। सर्वेषां वोभयमविधानात्।
सर्वेषां वोभवतीति। चतुरवत्तं पञ्चावत्तं वा। कुत एतत्। अविधानाज्जमदग्नी
नां पञ्चावत्तस्य। माध्यंदिनानां पठ्यते। तद्धि चतुरवत्तं भवति उतो पञ्चावत्तमेव
भवतीति। शाखांतरे तु पञ्चावत्तं च मदग्नीनामिति। तेन जमदग्नीनां पञ्चाव
त्तमेव। इतरेषां चतुरवत्तं पञ्चावत्तं वा। मध्यात्पूर्वार्द्धाच्चासंभिन्नं गुष्ठपर्व
मात्रमवदानं। हविषो मध्यात्पूर्वार्द्धाच्च असंभिन्नं गुष्ठपर्वमात्रमवदानं गृ
ण्हीयात्। असंभिन्नैर् वदानमर्यादां कुर्यात्। कुत एतत्। अवदानसंभेदने हिम

र्यादाबाधः। मर्यादाबाधे च मध्यात्पूर्वार्द्धाच्चेत्यस्य। मात्रावद्दधिपयसोः। दधि
पयसोरपि तन्मात्रमेवावदेयं। आद्यंतयोराज्यं। कर्त्तव्यमिति शेषः। सन्न्याज्यस्यो
पस्तीर्य द्विर्हविषोवदायाथोपरिष्टादाज्यस्याभिघारयतीति। एकप्रस्तवायं
स्विष्टकृतः। स्विष्टकृतस्त्ववदाने एकमवदानं प्रत्यवैति। द्विरभ्याभिघारणं। स्वि
ष्टकृत्येव भवति। अवदायप्रत्यभिघारणं प्राक् स्विष्टकृतः। तस्माद्यस्य कस्य च ह
विषोवद्यति पुनरेव तदभिघारयति स्विष्टकृत एव। तत्पुनराप्याययतीति। सर्व
हुत एककपालः। कर्त्तव्यः। द्यावापृथिवीयप्रकृतित्वात्। तत्प्रकृतित्वं च वक्ष्य

षष्ठ्यर्थीध्याये

स्य परिहारात्। अनुवाचनप्रैषो यथा देवतमभुष्मा अनुब्रूहीति। चतुर्थ्यन्तेनानुवाच
नं कर्त्तव्यं। आश्राव्यप्रैषे च। चतुर्थ्यन्तेनैं प्रेषणं। यत्र मैत्रावरुणस्य प्रैषः यथेंद्रा
ग्निभ्यां छागस्य वपां मेदः प्रेष्येति। अमुं यजेति। यत्र मैत्रावरुणस्य प्रैषाभावस्तत्रा
मुं यजेति द्वितीयांतेन प्रैषः। प्रैषानुवाचने षष्ठी वपायै धाना सोमेभ्य इति परिहा
य्य प्रैषसंबद्धेनुवाचने द्रव्ये षष्ठी विभक्तिर्भवति। वपायै धाना सोमेभ्य इति परि
हाय्य। असावित्यपनोदे। यत्रासौ यजासौ यजेति। यथा पुनरभ्युन्नीतिषु। तत्रे देव
ता विभक्तिर्व्यापनेदेवर्त्तते। अथवासाविस्यपनोद इति। यत्र मंत्रेऽसावितिस

वैनामशराद्वृस्तस्यापनोदं हृत्वा यस्तत्राभिधेयस्तन्नामादेशः कार्यः। सवषट्कारा
सु तिष्ठन्द्राक्षिण तउदकं प्राङ् षट्कृते। सवषट्कारास्याहुतिषु तिष्ठन्दक्षिणतो वि
तानस्योदक्प्राग्व्यवस्थितो वषट्कृते जुहोति। सहवा। सहवा वषट्कारेण जु
हुयात्। वाशब्दो विकल्पार्थः। तस्माद्दु सह वै वषट्कारेण जुहुयाद्वषट्कृते वेति।
उभयत आज्यं हविषः। स्पारयेत्। सहवा। एवमेव बर्हिश्श्रुतत्वात्। अनुवाच
न प्रैषो यथादेवतमिति प्रैषाः प्रक्रान्ताः अतस्तद्विषयैवेन चिन्त्यते। किम
ग्नीदग्नीन्विहारेत्येवमादयः कर्मचोदका उत संबोधनार्था मंत्रा इति। न

नुचोक्तमाचार्येण निगदानां मंत्रत्वं। ऋचोयजूंषि सामानि निगदा मंत्रा इति। स
त्यमेवं। मंत्रवैलक्षण्यात्तदेवाक्षिप्यते। स एव च निर्णयो भविष्यति। किं वैलक्षण्य
मिति चेत्। उच्यते। केचित्करणमंत्राये ऽनुष्ठानकाले पदार्थानस्मारयंति। केचि
ज्जपमंत्रा आम्नाआ अदृष्टार्थाः। अपरे क्रियमाणानुयाजादीन्नुः क्रियमाणमर्थमनुवदं
ति। यथाग्निमंथनीयादयः। न चैतद्रूपाः प्रैषाः। अपि विचविधिविभक्तियुक्ता एते लोट्५
अग्नीदग्नीन्विहर बर्हिस्तृणीहीति। तेना मंत्रत्वाशंका निवृत्त्यर्थमारभ्यते। व
र्तमानोपदेशात्। तवैचेति चच नान्निर्देशात्कर्मचोदकः। अग्निरग्नीन्विहरेत्से

उक्तमंत्राणां उक्तमामंत्रणास्यंतलोतरूपविधिभावतः। मंत्रप्रसिद्ध्यभावाद्यमंत्रतैषां नयुज्यते॥=

वमादिः कर्मचोदकः प्रतिपत्तव्यः। कुत एतत्। वर्त्तमानोपदेशात्। वर्त्तमान
मर्थमुपदिशंत्येवमादयोऽनुष्ठेयत्वेन। अग्निविहरणस्तरणक्रियानुष्ठेयत्वेनो।
च्यते। किंच चोदनाशब्दात्। चोदनाशब्दो हि भवति लिङ्लोटौ कर्मचोदकौ। लङ्
च्वनानि चैतानि श्रूयंते। अग्निरग्नीन्विहरवर्हिस्तृणीहीत्येवमादीनि। अतः कर्म
चोदकः। यदि च विधिविभक्तियोगेपि कर्मचोदकत्वेनाश्रीयते। लोट्श्रवणमन
र्थकमेव स्यात्। श्रुत्यर्थाभावाच्च। अपि च लोट्श्रवणादेवापमर्षो गम्यते। यदुत
कर्मचोदकत्वं। यदि विधिविभक्तियोगेपि कर्मचोदकात भवेयुः श्रुतार्थहानिः स्या

त्। किंच तवेचेति वचनात्। मंत्रत्वं लक्षणमेषां। तवे वचनाः प्रैषाः पठ्यंते। आम्न
यं तर्पयंतु पितृनेव इत्येवमाद्य इति वचनाच्च मंत्राः यथा उरु प्रथा उरु प्रथस्वेति प्रथय
स्वैवेनमेतदुरु ते यज्ञपतिः प्रथतामिति च। अतोपि मंत्रत्वं लक्षणप्राप्य मंत्रत्वे निर्दे
शादेपि च निर्दिष्टा मंत्राः। अहिर्बुध्न्यमंत्रं मे पाहि यमपथ यस्त्वयी विद्रो विदुः। कंचो
पजूषि सामानीति तन्मध्ये चोदनाम्नानाद्दमंत्रत्वं। अतः कर्मचोदकः। अपरेनि
र्देशादित्यन्यथा वर्णयंति। विधिविभक्तियोगाच्छेत्कुर्वंति कर्मनिर्देष्टुमित्येवं प्रा
प्ते आह। मंत्रो वा समभिव्याहारात्। वा शब्दः पक्षव्यावृत्तौ। मंत्रो वेवंजातीयकः प्र

तिपत्तव्यः। कुत एतत्। समभिव्याहारात्। य एभिरर्थोऽभिधीयते स समभिव्या
हृतो वाक्यांतरेण विहरत्यग्नीदग्नीनित्येवमादिना विधीयते। न च विहितस्य वि
धानमवकल्प्यते। अभिधानं तु संभवति। तस्मान्मंत्र एवंजातीयकः प्रतिपत्त
व्यः। अथवा समभिव्याहरणमेषां प्रयोगकाले चोद्यते। उत्तिष्ठन्नाहाग्नीन्विह
रेति। अथाह प्रोक्षणीरासादयेति च। यदि कर्मचोदका एते स्यूरभिव्याहरणमे
षां न चोद्येत। चोद्यते च तस्मान्मंत्रा इति। यत्पुनरुक्तं वर्त्तमानोपदेशादिति तन्मं
त्रत्वेपि न विरुध्यते। वर्त्तमानोपदेशको हि मंत्रो भवति। यदुच्यते। चोदनाशब्दा

चुत्वर्थाभावादिति। तत्रोच्यते। मंत्रत्वेप्येतन्न दुष्यति। न ह्योद्दिभक्ते विधानमेवैकोर्थः प्राप्तकालतायामपिलोड्स्मर्यते। अग्नीदग्नीन्विहरबर्हिस्तृणीहीति च। अग्नीदभिधीयते विहरणयोः प्राप्तकाल इति। यदपि मंत्रवैलक्षण्यमुक्तं। तवैवेतिवचनादिति। तदप्यनैकांतिकं। तवैववचना अपि मंत्रा दृश्यंते। कन्या इववहतुमेतवाउ इति मंत्रश्चायं। अनितिवचनाश्च मंत्रा दृश्यंते। सजूहोत्रेषस्यवाजिक्षिपणिं तुरण्यपती त्वेवमादयः। तस्माद्वैलक्षण्यं। यच्चोक्तं निर्देशादिति। निर्दिष्टा हि मंत्रा ऋचो यजूंषि सामानीति निगदा नाम निर्देशादमं

त्रत्वमित्यत्र ब्रूमः। यजुषां निर्देशात् निगदोपि निर्दिष्ट एवेत्यदोषः। अथ यावर्त्त
मानोपदेशादित्येवमादीनां व्याख्यांतरं प्रस्तूयते। पूर्वत्रापरितोषात्। उक्तमेव
हि निगदानां मंत्रत्वमिति। विषयव्याप्तिश्च भवति। इदमामनंति। आग्नेयोष्टा
कपालो भवति। ऐन्द्राग्नो द्वादशकपालो भवतीत्येवमादि। तत्रैतत्संदिह्यते। कि
मेते विधयः उत अर्थवादा होस्विन्मंत्रा इति। तत्रैतदुच्यते। नैते विधयो वर्त्तमानो
पदेशात्। यो हि वर्त्तमानमर्थमुपदिशति। सोनुवादसरूपत्वान्न विधिः स्यात्। वि
धानं तर्हि कीदृशादवगम्यते। अत आह चोदनाशब्दात्। लिङंताल्लोडंतात् या॰

स्मात्। एते हि विधेोस्मर्यंते। नचाग्नेयोष्टाकपालो भवतीत्येवमादयो लिंङ्तानच
लोङ्तानापि तव्यांताः। अतो न विधयोऽर्थवादास्तर्हि भवंत्वित्याशंकित आह। श्रु
त्यर्थाभावात्। अर्थवादा न भवंत्येते। श्रुतस्यात्यर्थस्यार्थवादो भवति स्तावकः। नचा
त्र श्रुतोर्थो विद्यते। य एभिः संस्तूयेत। तस्मान्नार्थवादाः। मंत्रास्तर्हि भवंतु। मंत्रा अ
पि न भवंत्येते। कुत एतत्। श्रुत्यर्थाभावादेव। श्रुतस्यात्यर्थस्य मंत्रः प्रयोगकाले वि
धायको भवति। नचासावस्तीति। किंच। तवैवेति वचनात्। तवैव वचनादिति वच
नाच्च मंत्रा ब्राह्मणे पद्यंते। नचैतल्लक्षणयुक्तास्तस्मादप्यमंत्रत्वमिति। तस्मात्स

वे प्रकाराभावादानर्थक्ये प्राप्त आह। निर्देशात्कर्मचोदकः कर्मचोदक एवंजा
तीयकः प्रतिपत्तव्यः। शक्नोतित्यसौ अर्थवादपदसंयोगात् पंचमल्लकारपरि
कल्पनाद्वारेण विधानं कर्त्तुं। ननु च वर्त्तमानोपदेशकोयं भवति स कथमिवाउ
वादसरूपत्वाद्विधिः स्यात्। यथा गच्छति पठतीत्येवमादयो न विधयः। एवमेते
पि। अत्रोच्यते। आग्नेयोष्टाकपालो भवतीति नानुवादोयं। नत्वसौ विहितः
क्वचिद्येनानूद्यते। तस्मादष्टाकपालो भवतीति भावयितव्य एवमवगम्यते। न
चाभावितोष्टाकपालो भवतीति तस्माद्भावयितव्य एवमर्थवादपदसंयोगोत्पत्त

एव। अग्निर्वै देवानां मुखमित्येवमादि। यदि वर्त्तमानोपदेशकस्यापि विधाय
कत्वमाश्रीयते। गायत्रेण त्वा छंदसा परिगृण्हामीत्येवमादिनामपि विधायक
त्वमस्तीत्येवं प्राप्तेऽत्राह। मंत्रो वा समभिव्याहारात्। मंत्रो वैवंजातीयं स्यात्। कुतः
समभिव्याहारात्। य एवमादिभिरर्थो निधीयते। स वाक्यांतरेण विहित एवेति। त
स्मान्मंत्रा एवमादयः। अर्थप्रसंख्ययाद्रव्योपकल्पनं। कर्त्तव्यमिति शेषः। चर्माण्यु
त्तरलोमानि प्राग्ग्रीवाणि। कर्त्तव्यानीति शेषः। अवरोक्तमुत्तरं हविषि। हविषि
यत्पश्चादभिहितं तदासा दनादिषु उत्तरं देशतः कालश्च प्रतिपत्तव्यं। एकद्रव्ये

साज्ये वेदेनोपग्रहणं। साज्ये एकस्मिन् द्रव्ये (पात्रे) वेद उपग्रहो भवति। एकद्रव्यग्रहणम
नेकद्रव्यव्युदासार्थं। स्फ्येनान्यत्र। आज्यादन्यत्रान्येन द्रव्येण द्रव्यवत्येकस्मिन् स्फ्ये
नोपग्रहणं। कुशैरत्सरु। असत्सरु वेदवत्र हि तीयद्रव्येषु कुशैरुपग्रहणं अपरेन्य
था वर्णयंति। असत्सरु द्रव्येषु जयोपस्थानादिषु कुशैरुपग्रहणं। पाणिभ्यां जुहूं
परिगृह्योपभृत्याधानमादानकाले संहादयन्। एवमेव हि श्रुतत्वात्। असंहा
दयन्। शब्दमकुर्वन्। इदमामनंति। अभिजिता यजेत विश्वजिता यजेतेत्यफलं संयु
क्ताश्वोदनास्तत्र चिंत्यते किमेषु फलमस्तु त नास्तीति। यद्दाच्चास्ति तदायत्किंचिद्दुत

स्वर्ग इति। किं तावत्प्राप्तं। फलाश्रवणान्नास्ति। फलमित्येवं प्राप्त उच्यते। वाच्यफले
षु स्वर्गः सामर्थ्यात्। सामर्थ्याद्भवितव्यमत्र फलेन। एवमेतान्यचोदनाः समर्थासं
गताः। यो ऽर्थवत्त्वो भवंति। इतरथा सापेक्षाः सत्योनर्थिकाः स्युः। न च वेदे मात्रामा
त्रस्यानर्थक्यमिष्यते। यच्च साकांक्षं वाक्यं तदध्याहारेण वानुषंगेण वा नि
राकांक्षीकर्त्तव्यं। एवं चार्थवद्भवति। तेनेह स्वर्गकामपदानुषंगः कार्यः।। विश्व
जिता यजेत स्वर्गकाम इति नैरुत्सुक्यं। ननु च पशुकामादिपदानुषंगः कस्मा
न्न क्रियते। तत्रोच्यते। स्वर्ग एव सर्वपुरुषैरभिवाञ्छ्यते तदेव सामर्थ्यादनुषज्य

ते। त्वाऽन्यानिफलवाक्यानि। एककर्मणि गुणविशेषे फलविशेषः। एकस्मिन्
कर्मणि गुणविशेषे फलविशेषेण भवितव्यं गुणविशेषाम्नानसामर्थ्यात्। हानवा
चनान्वारंभणवरवरणाव्रतप्रमाणेषु यजमानं प्रतीयात्। हानादीनि निगद्व्या
ख्यातानि। तेषां यजमानं कर्त्तारं प्रतीयात्। खातलूनछिन्नावहतपिष्टदुग्धद
ग्धेषु यजुः क्रियासंभवात्। खाते यूपावटे लूने बर्हिषि। छिन्ने यूपे। अवहतेषु व्रीहि
षु पिष्टेषु तंदुलेषु। दुग्धे पयसि। दग्धे महावीरे। एतेषु यजुषा क्रिया न भवति। कुत एत
त्। द्वाराभावात् क्रियाद्वारको हि मंत्र इति। एतच्चासंभवविषयमेव द्रष्टव्यं। शै द्रं राह

समासुरमाभिचरणिकं मंत्रमुक्त्वापित्र्यमात्मानं चालभ्योपस्पृशेदुप उपस्पृशेदपः। रौद्रादिमंत्रमुक्त्वा च शद्र्वेत्कर्म च कृत्वा दर्शयतिचैवं। रुद्रियेणैववा एतं दूचारिष्णुः शांतिरापस्तदद्भिः शांत्याशमयइति। त्रयीसारसमुद्धारसूत्रव्याख्यानमाहृतं। यत्तन्मयानुगृण्हातु साधुत्वेनेह साधवइति॥ ॥ उपाध्यायकर्ककृतौ कात्यायनीयसूत्रविवरणे परिभाषासमाप्ता॥ ६॥ ❀ ग्रंथसंख्या १२०० ❀❀❀❀❀❀❀

[OrderDescription]
,CREATED=13.07.20 15:38
,TRANSFERRED=2020/07/13 at 15:56:20
,PAGES=161
,TYPE=STD
,NAME=S0003301
,Book Name=M-2699-KALYANISUTRA VIVRANE PARIBHASHA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF

FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF

FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF

FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF

FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF

FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF

FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF

FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF